प्रवेश सं० १६२९१ विषय: पुराणेतिहासम् क्रम सं० ——

नाम कार्तिकमाहात्म्यम् (पद्मपुराणस्थम्) ग्रन्थकार ——

पत्र सं० २ – ३०

श्लोक सं० —— अक्षर सं० (पंक्तौ) ४६ पंक्ति सं० (पृष्ठे) १२

आकार: ९.८" × ४.२" 14450 लिपि: दे. ना. आधार: कागज.

वि० विवरणम् अपूर्णम् सं. १६७३

ना. १८८५

पी० एस० यू० पा०—७७ एस० सी० ई०—१९५१—५० ०००

Indira Gandhi National Centre for the Arts

धा ४

ये।तत्सर्वंकिमर्थंये यत्तेमंनसिवर्त्तते॥ ॥श्रीसत्योवाच॥दानंव्रतंतपोवापिकिंतुश्वेमयाकृतं॥येनाहंमर्त्यजामर्त्य
नावानीतानवंकिल॥तवांगार्द्धहरानित्यंगरुडासनगामिनी॥इंद्रादिदेवतावासमगमंयत्वयासह॥अनस्त्वा
परिशक्ष्यामिकिंकृतंतुमयाशुभं॥नवांनरेचकिंशीलाकाचहंकस्यकन्यका॥श्रीकृष्णउ०॥शृणुष्वेकमनाकांते
यथात्वंसर्वजन्मनि॥पुण्यंव्रतंकृतवतीतत्सर्वंकथयामिते॥आसीत्कृतयुगस्यांतेमायापुर्यांद्विजोत्तमः॥आ
त्रेयोवेदशर्मेतिवेदवेदांगपारगः॥अतिथियोग्निशुश्रूषुःसौरव्रतपरायणः॥सूर्यमाराधयन्नित्यंसा
क्षात्सूर्यइवापरः॥तस्यातिवयसश्चासीन्नाम्नागुणवतीसुता॥अपुत्रःसस्वशिष्यायचंद्रनाम्नेददौ
सुतां॥तमेवपुत्रवन्मेनेसचतंपितृवद्वशी॥तौकदाचिद्वनंयातौकुशेध्माहरणार्थिनौ॥हिमाद्रिपादजवनेचर
न्तौयातस्ततः॥तावत्तौराक्षसंघोरमायांतंप्रपश्यतुः॥भयविह्वलसर्वांगावसमर्थौपलायितुं॥निहतौ
राक्षसातेनकृतांतसमरूपिणा॥तौतत्क्षेत्रप्रभावेन धर्मशीलतयापुनः॥वैकुंठभवनंनीतौमद्गणैर्मत्समी
पगौ॥यावज्जीवंतुयत्ताभ्यांसूर्यपूजादिकंकृतं॥तेनाहंकर्मणातात्यांसुप्रीतोहंनवल्किल॥सोराशौवाश्वगा
तात्यावैष्णवाःशक्तिपूजकाः॥मामेवप्राप्नुवंतीहवर्षापःसागरंयथा॥एकोहंपंचधाजातःक्रीडयानामभिः
किल॥देवदत्तोयथाकश्चित्पुत्राद्याह्वानेननामभिः॥श्रीकृष्णउ०॥ततस्तौमद्भवनाधिवासिनौविमानयानौरवि

Indira Gandhi National
Centre for the Arts

वर्षसावुनौ॥ मनुष्यरूपौ मम सन्निधानगौ दिव्यांगनावंदनयोगतो गिनौ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहा
त्म्ये कृष्णसत्यभामासंवादे प्रथमोध्यायः॥ ॥श्रीकृष्ण उवाच॥ ॥ततो गुणवती श्रुत्वा रुदंती सा निहतावुभौ
॥पितृभर्त्तृजदुःखार्त्ता करुणं पर्यदेवयत॥ गुणवत्युवाच॥ हा नाथ हा पितस्त्यक्त्वा गच्छतः क्व मया विना॥
बालाहं किं करोम्यद्य हा नाथा सततो विना॥ कोनु मामाश्रितां गेहे भोजनाच्छादनादिभिः॥ अकिंचनकुशलां स्ने
हात्पालयत्यतिदुःखितां॥ हतभाग्या हतसुखा हताशा हतजीविता॥ शरणं कं प्रयाम्यद्य [illegible]
यो मे दुःखं प्रमार्जयेत्॥ क्व गच्छामि क्व तिष्ठामि किं करोमि यथाघृणं॥ विधात्रा हा हता सृष्ट्वा कथं जीवामि बालिशा
२८ ॥श्रीकृष्ण उवाच॥ एवं बहुविलप्याथ कुररीव सुदुःखातुरा। पपात भूमौ विकला रंभावातहता यथा॥ चिरादाश्वस्य सा च
यो विलप्य करुणं बहु॥ निमग्ना शोकजलधौ दुःखार्त्ता सम वर्त्तत॥ सा गृहोपस्करान्सर्वान्विक्रीय सुतनकर्मकृत्। तयोः
प्रत्येकं यथाशक्ति पारलौकिकं तदाकरोत्॥ तस्मिन्नेव पुरे चक्रे वासं प्रसृति जीविनी॥ विष्णुभक्तिरता शांता सत्यशौ
चाहितत्परा॥ व्रतद्वयं तया सम्यगाजन्म मरणात्कृतं॥ एकादशीव्रतं सम्यक्सेवनं कार्त्तिकस्य च॥ एतद्व्रतद्वयं २
कांते मम प्रीतिप्रियंकरं॥ भुक्तिमुक्तिप्रदं पुण्यं पुत्रसंततिदायकं॥ कार्त्तिके मासि ये नित्यं तुलासंस्थे दिवाकरे॥ प्रा
तः स्नास्यंति ते मुक्ता महापातकिनोपि च॥ स्नानं जागरणं दीपं तुलसीवनपालनं॥ कार्त्तिके ये प्रकुर्वंति ते नराः वि

ष्णुमूर्त्तयः॥ सम्मार्जनं विष्णुगृहे स्वस्तिकादिनिवेदनं॥ विष्णोः पूजां च ये कुर्युर्जीवन्मुक्तास्त्विह ते नराः॥ इत्थं दिनत्रय
मपि कार्त्तिके ये प्रकुर्वते॥ देवानामपि ते वंद्याः किं वै आजन्मतः कृतं॥ इत्थं गुणवती सम्यक् प्रत्यब्दं व्रतिनी हरे
ल॥ नित्यं विष्णोः परिचर्यां तत्परमानसा॥ कदाचित्सरुजा साथ ज्वरार्त्ता गात्रपीडिता। स्नातुं गंगां गता
कांते कथंचित्सनकैः स्तदा॥ यावज्जलांतरगता कंपिता शीतपीडिता॥ तावत्स विह्वलापश्यद्विमानं यानमंब
रात्॥ शंखचक्रगदापद्महस्तैरासीनमंबरात्॥ विष्णुरूपधरैः सम्यक् वैनतेयध्वजांकितं॥ आरोहयद्विमानं तमप्स
रोगणसेवितं॥ चामरैर्वीज्यमाना सा वैकुंठभवनं नयन्॥ अथ सा तद्विमानस्था ज्वलदग्निशिखोपमा॥ कार्त्तिकव्र
तपुण्येन मत्सान्निध्यगता भवत्॥ अथ ब्रह्मादिदेवानां यथा प्रार्थनया भुवं॥ आगतो हं गणाः सर्वे यातास्तेपि म
या सह॥ एते हि यादवाः सर्वे मद्गणा एव भामिनि॥ पिता ते देवशर्म्मा च सत्राजिद्यादवोभवत्॥ पद्मचंद्रनामा सोक्रूरस्त
स्मात् गुणवती सुता। कार्त्तिकस्नानपुण्येन बहुमत्प्रीतिदायिनी॥ मद्द्वारि यच्च या पूर्वं तुलसीवाटिका कृता। तस्माद
यं कल्पवृक्षस्तवांगणगतः शुभे॥ कार्त्तिके दीपदानं च यथा तु पुरा कृतं। त्वद्देहगेहसंस्थेयं तस्मात् लक्ष्मीः स्थिरा भव
त्॥ यच्च व्रतादिकं सर्वं विष्णवे तत्स्वरूपिणे॥ निवेदितवती तस्मान्मम भार्यात्वमागता॥ आजन्ममरणात्सर्वं यत्का
र्त्तिकव्रतं कृतं॥ कदाचिदपि तेन त्वं मद्वियोगं न यास्यसि॥ एवं ये कार्त्तिके मासि नरा व्रतपरायणाः॥ मत्सान्निध्य

Indira Gandhi National Centre for the Arts

न्विध्यगतास्तेपिप्रीतिदाश्चैव यथा मम॥ यत्कृता न व्रततपःकारिणो मानवा भुवि॥ कार्त्तिकव्रतपुण्यस्य नाप्नुवंति
कलामपि॥ सूत उवाच॥ इत्युक्तिराम्यस्तु वनाधिपतेस्तदानीं प्राग्जन्मपुण्यं भववैभवतां न हर्षा॥ विश्वेश्वरं त्रि
भुवनैकनिदानभूतं कृष्णं प्रणम्य वचनं निजगाद सत्या॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये श्रीकृष्णसत्य
नामासंवादे द्वितीयोध्यायः॥ श्रीसत्योवाच॥ सर्वेपि कालावयवास्त्वं च कालस्वरूपिणः॥ समाः सत्कं कथं ना
थ मासानां कार्त्तिको वरः॥ एकादशी तिथीनां च मासानां कार्त्तिकप्रियः॥ कथं देवेश दे तेषां कारणं किं च कथ्यतां॥
श्रीकृष्ण उवाच॥ ॥साधु पृष्टं त्वया कांते शृणुष्वैकाग्रमानसा॥ पृथोर्वैन्यस्य संवादं महर्षेर्नारदस्य च॥ एवमे
व पुरा पृष्टो नारदः पृथुना तदा॥ उवाच कार्त्तिकाधिक्यकारणं सर्वविन्मुनिः॥ श्रीनारद उवाच॥ शंखनामा
भवत्सर्वमसुरः सागरात्मजः॥ त्रिलोकीमथनः शश्वन्महाबलपराक्रमः॥ जित्वा देवान्निराकृत्य स्वर्लोकात्स
महासुरः॥ इंद्रादिलोकपालानामधिकारांस्तदाहरत्॥ तद्भयाद्वचते देवाः सुवर्णाद्रिगुहां गताः॥ न्यवसन्बहुव
र्षाणि सावरोधाः सबांधवाः॥ सुवर्णाद्रिगुहादुर्गसंस्थितास्त्रिदशा यदा॥ तद्रक्षयानो बलवांस्तदा दैत्यो विचारयत्॥ ३
हृताधिकारास्त्रिदशा मया यद्यपि निर्जिताः॥ रक्षंते बलसंयुक्ताः करणीयं मया त्र किं॥ आम्नातं तु मया देवा वेदमं
त्रबलान्विताः॥ तान्हरिष्ये ततः सर्वे बलहीना भवंति वै॥ इति मत्वा ततो दैत्यो विष्णुमालक्ष्य निद्रितं॥ सत्यलोका

ज्जहाराशु वेदानादिस्वयंभुवः॥ नीतास्तेन ते वेदास्तद्भयात्ते निराक्रमत्॥ तोयान्निधिं विष्णुर्यत्र मंत्रबीजस
मन्विताः॥ तान्मार्गमाणः शंखोपि समुद्रांतरगो भवत्॥ न ददर्श तदा दैत्यः क्वचिदेकत्र संस्थितान्॥ अथ ब्रह्मा
सुरैः सार्द्धं विष्णुं शरणमन्वियात्॥ पूजोपकरणान्गृह्य वैकुंठभवनं गताः॥ तत्र तस्य प्रबोधाय गीतवाद्यादि
काः क्रियाः॥ चक्रुर्देवास्तथा गंधधूपदीपान्मुहुर्मुहुः॥ ततः प्रबुद्धो भगवान् तद्भक्तिपरितोषितः॥ ददृशे तैः सुरै
स्तत्र सहस्रार्कसमद्युतिः॥ उपचारैः षोडशभिः संपूज्य त्रिदशास्तदा॥ दंडवत्पतितान्नम्रो तानुवाचाथ माध
वः॥ श्रीविष्णुरुवाच॥ ॥वरदोहं सुरगणा गीतवाद्यादिमंगलैः॥ मनोभिलषितान्कामान्सर्वानेव ददामि वः॥ ऊ
र्जस्य शुक्लैकादश्यां यावद्बोधिनी भवेत्॥ निशांत्ये तुर्यशशेषे गीतवादित्रमंगलैः॥ कुर्वंति नित्यं मनुजान
ड्रिर्यद्यथाकृतं॥ ते मत्प्रीतिकरा नित्यं मत्सान्निध्यं व्रजंति हि। पाद्यार्घ्याचमनीयाद्यैर्यद्भवद्भिरुपाहृतं॥ तद
कुंतगुणं तस्मात्तज्जातं वो सुखकारणं॥ वेदाः शंखाहृताः सर्वे तिष्ठंत्युदकसंस्थिताः॥ तानानयाम्यहं देवा हत्वा
सागरनंदनं॥ अद्यप्रभृति वेदास्ते मंत्रबीजसमन्विताः॥ प्रत्यब्दं कार्त्तिके मासि विश्रमंत्यप्सु सर्वदा॥ मत्स्यरू
पोहमपि च भवामि जलमध्यगः भवंतोपि मया सार्द्धं मायांतु समुनीश्वराः॥ कालेस्मिन्ये च कुर्वंति प्रातःस्नानं न
रोत्तमाः॥ ते सर्वयज्ञावभृथैः सुस्नाताः स्युर्न संशयः॥ एकादश्यां व्रतं सम्यक्कुर्वंति मनुजाः सदा॥ ते देहांते लभ

Indira Gandhi National Centre for the Arts

त्वत्प्राप्यामहं वनं सदा॥ विघ्नेभ्यो रक्षणं तेषां तथा कार्यं यमत्वया॥ देयात्त्वया तत्करुणपुत्रपौत्रादिसंततिः॥
धनवृद्धिर्धनाध्यक्ष त्वया कार्या मि प्रायः॥ मम रूपधरः साक्षाज्जीवन्मुक्तो भवेद्यतः॥ अजन्ममरणा येन कृ
तमेतद्व्रतोत्तमं॥ यथोक्तविधिना सम्यक् कृतमान्यो नवतामपि॥ एकादश्यां यतश्चाहं त्वया वन्हिः प्रतिबोधितः॥ अत
श्चैषा तिथिर्मान्या सातीव प्रीतिदा मम॥ ॥अग्निरुवाच॥ ॥व्रतद्वयं समस्यागिदं नरैः कृतं सात्विष्यन्नेव तथा
न्यदस्ति॥ दानानि तीर्थानि तपांसि यज्ञाः स्वल्पं कदान्यव सदा नरोत्तमाः॥ इति श्रीपद्मपुराणे कार्त्तिकमाहा
त्म्ये तृतीयोध्यायः॥ श्रीनारद उवाच॥ इत्युक्त्वान्तर्गतो विष्णुः शफरीतुल्यरूपधृक्॥ पपात तज्जलौ विंध्यवा
सिनः कश्यपस्य च॥ अस्त कमंडलौ क्षिप्रं रूपयाक्षिप्रवान्मुनिः॥ तावत्सनममौ तत्र ततः कूपेप्यवेशयत
॥ तत्रापि न ममौ तावत्कासारं प्रापयत्सतः॥ एवं स सागरं क्षिप्तस्तत्र साप्यवर्द्धत॥ ततो वधीत्सतं शंखं विष्णु
र्मत्स्यस्वरूपधृक्॥ अथ तत्स्वकरे धृत्वा बदरीवनमागमत्॥ तत्राहूय ऋषीन् सर्वानिदमाज्ञापयद्विभुः॥
॥ श्रीविष्णुरुवाच॥ ॥ जलांतरविशीर्णाः स्युः वेदान्वमार्गत॥ आनयध्वं रिताश्च सरहस्या जलांतरात्॥ ५
तावत्प्रयागे तिष्ठामि देवतागणसंयुतः॥ ॥श्रीनारद उवाच॥ ॥ ततस्ते सर्वमुनिभिस्तपोबलसमन्वितैः॥
उद्धारिताः सबीजाश्च वेदा यज्ञसमन्विताः॥ तेस्म यावन्मितं येन लब्धं तावन्मितं स्फुटं॥ स सः एव ऋषिर्जात

स्लदा प्रन्नतिपार्थिव॥ अथ सर्वोपसंगम्य प्रयागं मुनयो ययुः॥ विष्णवे स विधात्रे ते लब्ध्वा वेदान्यवेदयत्॥ लब्ध्वा वेदा
न्मयज्ञोक्त ब्रह्मा हर्षसमन्वितः॥ अथ यथाज्ञश्चमेधेन देवर्षिगणसेवितः॥ यज्ञांते देवगंधर्वयक्षपन्नगगुह्यकाः॥ नि
पत्य दंडवद्भूमौ विज्ञप्तिं तत्र चक्रिरे॥ देवा ऊचुः॥ देवदेव जगन्नाथ विज्ञप्तिं शृणु नः प्रभो॥ हर्षकालो यमस्माकं तस्मा
त्वं वरदो भव॥ स्थानेस्मिन्द्रुहिणो वेदान्नष्टान्प्राप पुनः स्वयं॥ यज्ञानां गात्वयं प्राप्तास्तस्मात्सारा रमापते॥ स्थानमेतदत
श्रेष्ठं पृथिव्यां पुण्यवर्द्धनं॥ भुक्तिमुक्तिप्रदं चास्तु प्रसादाद्भवतः सदा॥ कालोप्ययं महापुण्यो ब्रह्मघ्नादिवि
गुप्ते ...॥ दत्ताक्षयकरश्चास्तु वरमेतद्ददस्व नः॥ श्रीविष्णुरुवाच॥ ॥ ममाप्येतन्मतं देवा यद्भवद्भिरुदाहृत
द्विकत९ ॥ तत्र दाशुल मस्तेन ब्रह्मक्षेत्रमिति प्रथां॥ सूर्यवंशोद्भवो राजा गंगामत्रानयिष्यति॥ सा सूर्यकन्यया चात्र
कालिंद्या योगमेष्यति॥ स्वयं चर्वब्रह्माद्या निवसंतु मया सह॥ तीर्थराजेति विख्यातं तीर्थमेतद्भविष्यति॥ दानं व्र
तेतपो होमो जपः पूजादिकाः क्रियाः॥ अनंतफलदाः संतु मत्सान्निध्यगताः सदा॥ ब्रह्महत्यादिपापानि सप्तज
न्मार्जितान्यपि॥ दर्शनादस्य तीर्थस्य विनाशं यांति तत्क्षणात्॥ देहत्यागं तथा धीराः कुर्वंति मम सन्निधौ॥ मत्त
नुं प्रविशंत्येव न पुनर्जन्मने नराः॥ पितॄनुद्दिश्य ये श्राद्धं कुर्वंत्यत्र ममाग्रतः॥ तेषां पितृगणाः सर्वे यांति तम
सलोकतां॥ कालोप्येष महापुण्यः फलदस्तु सदा नृणां॥ सूर्ये मकरगे प्रातः स्नायिनो पापनाशनः॥ मकरस्थे रवौ
माघे प्रातः स्नानं प्रकुर्वतां॥ दर्शनाद्देवपापानि यांति सूर्याद्यथा तमः॥ सलोकत्वं समीपत्वं सारूप्यं त्वत्रितिः

Indira Gandhi National
Centre for the Arts

मात्॥ नर्णदद्दाम्यहं स्नाने म्नी घेमकरे गरवौ॥ स्वयं मुनीश्वराः सर्वे शृणुध्वं वरदोस्मि वः॥ बदरीवनमध्येहं सदा तिष्ठा
मि सर्वगः॥ अन्यत्र दशभिर्वर्षैस्तपसा वाप्यते फलं॥ तत्र तद्दिवसेकेन नरैर्वह्निः प्राप्यते फलं॥ स्नानस्य दर्शनं तस्य
कुर्वंति नरोत्तमाः॥ जीवन्मुक्ताः सदा ते षु पापं नैवावतिष्ठति॥ सूत उवाच॥ एवं देवान्देवदेवस्तु स्नातत्रैवांत
र्दधे नमागास्तवेधाः॥ देवाः सर्वे पंचशाके स्तत्र तिष्ठंत्यंतर्द्धानं प्रापुरिंद्रादयस्ते॥ गाथामिमां शृणुयान्नरोत्तमो यः
श्रावयेद्वापि विशुद्धचेताः॥ स तीर्थराजं बदरीवनं यत्कृत्वा फलं तत्समवाप्नुयाच्च॥ इति श्रीपद्मपुराणे कार्त्तिकमा
हात्म्ये चतुर्थोध्यायः॥ पृथुरुवाच॥ महत्फलं त्वया प्रोक्तं मुने कार्त्तिकमाघयोः॥ तयोः स्नानविधिं सम्यक् निय
मानपि नारद॥ उद्यापनविधिं चैव यथावद्वक्तुमर्हसि॥ श्रीनारद उवाच॥ ॥ त्वं विष्णोरंशसंजातो नाज्ञातं विद्यते तव
तथापि वदतः सम्यक् नामाहं त्वं शृणु वैनघ॥ आश्विनस्य तु मासस्य यामच्छुक्लैकादशी भवेत्॥ कार्त्तिकव्रतनिय
मेतस्यां कुर्यादतंद्रितः॥ रात्र्यां तुर्यांशे चोत्थाय मुदा तिष्ठेत्सदा व्रती॥ नैर्ऋत्यां शां व्रजेद्ग्रामाद्बहिः सोदकभाजनः॥ दि
वासंध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः॥ कुर्यान्मूत्रपुरीषे च रात्रौ च दक्षिणामुखः॥ गृहीतशिश्नश्चोत्थाय गृही
तशुचिमृत्तिकः॥ गंधलेपक्षयकरं शौचं कुर्यादतंद्रितः॥ एका लिंगे पंच गुदे त्रिर्वामे दश चोभयोः॥ तथैव पादयोः पंच
गृहिणां शौचमुच्यते॥ एतद्द्विगुणं प्रोक्तं ब्रह्मचारिवनस्थयोः॥ यतेश्चतुर्गुणं रात्रौ तदर्द्धं शौचमाचरेत्॥ तदर्द्धं रू
ग्मार्गस्थे स्त्रीशूद्राणां तदर्द्धकं॥ शौचकर्मविहीनस्य सकला निःफलाः क्रियाः॥ मुखशुद्धिविहीनस्य न मं

त्राः फलदाः स्मृताः॥ दंतजिह्वाविशुद्धिं च ततः कुर्यात्प्रयत्नतः॥ आयुर्बलं यशोवर्चः प्रजां पशून्वसूनि च॥ ब्रह्म
प्रज्ञां च मेधां च त्वन्नो धेहि वनस्पते॥ इमं मंत्रं समुच्चार्य द्वादशांगुलकं गृही॥ समिधा क्षीरवृक्षस्य कुर्याद्दोपोषणे
विना॥ प्रतिपद्दर्शनवमीषष्ठीश्चार्कदिने विना॥ चंद्रसूर्योपरागे च न कुर्याद्दंतधावनं॥ कंटकीक्षीरवृक्षकार्पासीनि
र्गुंडीब्रह्मवृक्षकाः॥ वटैरंडविगंधाद्या वर्ज्या ये दंतधावने॥ ततो विष्णोः शिवस्यापि गृहं गच्छेत्ससन्नधीः॥ गंधध
पुष्पसतांबूलो गृहीत्वा भक्तितत्परः॥ तत्र देवस्य पाद्यादीनुपचारान्पृथक्पृथक्॥ कृत्वा स्तुत्वा पुनर्नत्वा कु
र्याद्गीतादिमंगलं तालवेणुमृदंगादिध्वनियुक्तान्सनर्तनान्॥ पुष्पैर्गंधैः सतांबूलैर्गायकानपि वार्चयेत्
॥ देवालये गायनपरायतस्ते विष्णुमूर्त्तयः॥ तपांसि यज्ञा दानानि कृतानि बहुगकुराः॥ तुष्टिदानकलो यस्माद्भक्त्या
दानं प्रशस्यते॥ नाहं वसामि वैकुंठे योगिनां हृदये रवौ॥ मद्भक्ता यत्र गायंति तत्र तिष्ठामि नारद॥ तेषां पूजादिकं
गंधपुष्पादि क्रियते नरैः॥ तेन प्रीतिं परां यामि न तथा मत्प्रपूजनात्॥ मत्पुराणकथां श्रुत्वा मद्भक्तानां च गायनं
गच्छंति येन राम्यत्रास्ते मद्गेष्यानवंति हि॥ श्रुत्वा च वससि देवेश मया दृष्टः स्वरूपवान्॥ विष्णुरवततदा प्राह मद्भक्तिपरित
षितः॥ शिरीषोन्मत्तगिरिजामल्लिकाशाल्मलीभवैः॥ अर्कैः कूटैः कर्णिकारैश्च विष्णुर्नार्च्यस्तथा कृतैः॥ जपाकुंदशिरी
षयूथिकामालतीभवैः॥ केतकीभवपुष्पैश्च नैवार्च्यः शंकरः सदा॥ गणेशं तुलसीपत्रैर्दुर्गां नैव तु दूर्वया॥ मुनि
पुष्पैस्तथा सूर्यं लक्ष्मीकामो न चार्चयेत्॥

Indira Gandhi National Centre for the Arts

ये स्पोन्यानि प्रशस्तानि पूजाप्रेन सर्वदैवतु ॥ एवं पूजाविधिं कृत्वा देवदेवं क्षमापयेत् ॥ मंत्रहीनं क्रियाहीनं भक्तिहीनं सु
रेश्वर ॥ यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥ ततः प्रदक्षिणं कृत्वा दंडवत्प्रणिपत्य च ॥ पुनः क्षमापयेद्देवं गायनादीन् स
माप्रयेत् ॥ ॥ श्रीनारद उवाच ॥ विष्णोः शिवस्यापि च पूजनं ये कुर्वंति सर्वादरतः कार्त्तिकस्य ॥ निधूतपापाः सह पूर्वजैस्ते
प्रयांति विष्णोर्भुवनं मनुष्याः ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये पंचमोध्यायः ॥ श्रीनारद उवाच ॥ ॥ नाडीद्वयावशि
ष्टायां रात्र्यां गच्छेज्जलाशयं ॥ तिलगंधाक्षता पुष्पयवाद्यैः सहितः शुचिः ॥ मानुषे देवखाते वा तथा मध्ये च संगमे ॥ के
मा कृत्वा गुणे स्नाने तीर्थे तत्फलं स्मृतं ॥ विष्णुस्मरणतः कुर्यात् संकल्पं स्वजनस्य तु ॥ तीर्थानि देवता दिव्याः क्रमादर्घा
णि दापयेत् ॥ नमः कमलनाभाय नमस्ते जलशायिने ॥ नमस्तेस्तु हृषीकेश गृहाणार्घ्यं नमोस्तु ते ॥ वैकुंठं च प्र
यागं च तथा बदरिकाश्रमे ॥ यतो विष्णुस्त्रिविक्रमस्त्रयो निदधे पदं ॥ अतो देवा अवंतु यतो विष्णुर्विचक्रमे ॥ तैरेव सहि
तः सर्वैर्मुनिवृंदसमन्वितैः ॥ कार्त्तिकेहं करिष्यामि प्रातःस्नानं जनार्दन ॥ प्रीत्यर्थं तव देवेश दामोदर मया सह
॥ नित्ये नैमित्तिके कृत्स्ने कार्त्तिके पापशोधने ॥ गृहाणार्घ्यं मया दत्तं दनुजेंद्रनिषूदन ॥ स्मृत्वा भागीरथीं विष्णुं शिवं स
र्यं जले विशेत् ॥ नाभिमात्रे ततस्तिष्ठन् व्रती स्नायाद्यथाविधिः ॥ तिलामलकचूर्णेन गृही स्नानं समाचरेत् ॥ वि ६
धवास्त्रीयतीनां च तुलसीमूलमृत्तिका ॥ सप्तमीदर्शनवमीद्वितीयादशमीषु च ॥ त्रयोदश्यां च न स्नायाद्धात्रीफल
तिलैः सदा ॥ आदौ कुर्यान्मलस्नानं मंत्रस्नानं ततः परं ॥ स्त्रीशूद्राणां न वेदोक्तैर्मंत्रैस्तेषां पुराणजैः ॥ त्रिधा त्वद्द्व

कार्यार्थयः पुरा भक्तिभावनः ॥ स विष्णुः सर्वपापघ्नः पुनातु कृपया त्र मां ॥ विष्णोराज्ञामनुप्राप्य कार्त्तिकव्रतकारणा
त् ॥ क्षमंतु देवास्ते सर्वे मां पुनंतु सवासवाः ॥ वेदमंत्राः सबीजाश्च सरहस्याः सपल्लवाः ॥ कश्यपाद्याश्च मुनयो मां
पुनंतु सदैवताः ॥ गंगाद्याः सरितः सर्वास्तीर्थानि जलदा नदाः ॥ ससप्तसागराः सर्वे मां पुनंतु जलाशयाः ॥ पतिव्रता
स्त्वदित्याद्याः यक्षाः सिद्धाः सपन्नगाः ॥ ओषध्यः पर्वताश्चापि मां पुनंतु त्रिलोकजाः ॥ एभिः स्नात्वा व्रती मंत्रैर्हस्तन्य
स्तपवित्रकः ॥ देवर्षिमानवपितॄन् तर्पयेच्च यथाविधिः ॥ यावंतः कार्त्तिके मासि वर्त्तते पितृतर्पणे ॥ तिलास्ता
स्त्संख्यकाब्दानि पितरः स्वर्गवासिनः ॥ ततो जलाद्विनिःक्रम्य शुद्धवस्त्रावृतो व्रती ॥ प्रातःकालोचितं कर्म समा
प्यार्चयेद्धरिं पुनः ॥ तीर्थानि देवं संस्मृत्य पुनरर्घ्यं प्रदापयेत् ॥ गंधपुष्पफलैर्युक्तं भक्त्या तत्परमानसः ॥
व्रतिनः कार्त्तिके मासि स्नातस्य विधिवन्मम ॥ गृहाणार्घ्यं मया दत्तं राधया सहितो हरे ॥ ततश्च ब्राह्मणान्नत्वा
तोषयेद्वेदपारगान् ॥ गंधैः पुष्पैः सतांबूलैः प्रणमेच्च पुनः पुनः ॥ तीर्थानि दक्षिणे पादे वेदास्तन्मुखमाश्रिताः ॥
सर्वांगेष्वाश्रिता देवाः पूजितास्त्वं च दृश्यया ॥ अव्यक्तरूपिणो विष्णोः स्वरूपं ब्राह्मणा भुवि ॥ नावमान्या न विरो
ध्याः कदाचिच्छुभमिच्छता ॥ ततो विष्णुप्रिया देवी तुलसी मर्चयेद्व्रती ॥ प्रदक्षिणनमस्कारान् कुर्यादेकाग्रमा
नसः ॥ देवैस्त्वं निर्मिता पूर्वमर्चितासि मुनीश्वरैः ॥ नमो नमस्ते तुलसि पापं हर हरिप्रिये ॥ ततो विष्णुकथां श्रुत्वा
पौराणीं स्थिरमानसः ॥ आख्यानं तु ततो नित्यं पूजयेद्भक्तिमान् व्रती ॥ एवं सर्वविधिं सम्यक् कुर्वीत कार्त्तिकमा

Indira Gandhi National
Centre for the Arts

र:॥करोतियःसलस्ततेनारायणसलोकतां॥श्रीनारदउवाच॥ ॥रोगापहंपातकनाशकृत्परंसद्बुद्धिदंपुत्रधनादिसा
धकं॥मुक्तेर्निदानंनहिकार्त्तिकव्रताद्विष्णुप्रियादन्यदिहास्ति[illegible]भूतले॥इतिश्रीपद्मपुराणेकार्त्तिकमाहा
त्म्येषष्टोध्यायः॥श्रीनारदउवाच॥कार्त्तिकव्रतिनांपुंसांनियमायेप्रकीर्त्तिताः॥तान्हंशृणुष्वमहाराजकथ्यमाना
न्समासतः॥सर्वामिषाणिमांसंचक्षौद्रंसौवीरकंतथा॥राजिकामादकंवापिनैवाद्यात्कार्त्तिकेव्रती॥द्विदलंतिलतै
लंचतथान्नंचाल्पदूषितं॥भावदुष्टंशब्ददुष्टंवर्जयेत्कार्त्तिकेव्रती॥देववेदद्विजानांचगुरुगोव्रतिनांतथा॥स्त्रीरा
जमहतांनिंदांवर्जयेत्कार्त्तिकेव्रती॥प्राण्यंगमामिषंचूर्णंफलेजंबीरमामिषं॥धान्येमसूरिकाःप्रोक्ताअन्नं
पर्य्युषितंतथा॥गोछागीमहिषीवर्ज्जंतादन्यदुग्धादिवामिषं॥द्विजक्रीतारसाःसर्वेलवणंभूमिजंतथा॥
ताम्रपात्रस्थितंगव्यंजलंपल्वलसंस्थितं॥आत्मार्थेपचितंचान्नंआमिषंतद्बुधैःस्मृतं॥ब्रह्मचर्यमधःसुप्ति
पत्रावल्यांचभोजनं॥चतुर्थकालेभुक्तिंचकुर्य्यादेवंसदाव्रती॥नरकस्यचतुर्दश्यांतैलाभ्यंगंतुकारयेत्॥
अन्यत्रकार्त्तिकेस्नायीतैलाभ्यंगंविवर्ज्जयेत्॥पलांडुंलशुनं[illegible]छत्राकंगृंजनंतथा॥नालिकामूलकंशि
ग्रुंवर्जयेत्कार्त्तिकेव्रती॥आलाबुंवापिवृंताकंकूष्मांडंबृहतीफलं॥श्लेष्मातकंकपित्थंचवर्जयेद्वैष्णवव्र
ती॥रजस्वलांत्यजम्लेच्छपतितव्रात्यकैस्तथा॥द्विजविड्वेदबाह्यैश्चनवदेत्सर्वदाव्रती॥एतैर्दृष्टंचकाकैश्च
सूतकान्नंचवर्जयेत्॥द्विःपाचितंचदग्धान्नंनैवाद्याद्वैष्णवव्रती॥एतानिवर्जयेन्नित्यंव्रतीसर्वव्रतेष्वपि॥

कृच्छ्राद्यंवापिकुर्वीतस्वशक्त्याविष्णुतुष्टये॥क्रमात्कूष्मांडबृहतीतरुणीमूलकंतथा॥श्रीफलंचकलिंगंचफ
लंधात्रीनवंतथा॥नालिकेरमलाबुंचपटोलंबदरीबलं॥चर्म्महिंताकजंबच्छशाकंतुजलजंतथा॥१५॥शाका
न्येतानिवर्ज्यानिक्रमात्प्रतिपदादिषु॥धात्रीफलेरवौतद्वद्वर्जयेत्सर्वदागृही॥योन्यात्यद्वर्जयेत्किंचिद्विद्याद्वि
ष्णुप्रीतयेनरः॥तत्तुनब्राह्मणेदत्त्वानकुर्यात्सर्वदैवहि॥एवमेवहिमान्योपिकुर्याच्चनियमान्व्रती॥हरिजागरणं
तत्रप्रबोधिन्यांचकारयेत्॥यथोक्तकारिणंदृष्ट्वाकार्त्तिकव्रतिनंनरं॥यमदूताःपलायंतेगजाःसिंहार्दिता
इव॥वरंविष्णुव्रतंह्येतन्नयज्ञशतयाजकः॥यज्ञंकृत्वाप्नुयात्स्वर्गंवैकुंठंकार्त्तिकव्रती॥भुक्तिमुक्तिप्रदा
नीहयानिक्षेत्राणिभूतले॥वसंतितानितद्देहेकार्त्तिकव्रतकारिणः॥दुःस्वप्नंदुष्कृतंकिंचिन्मनोवाक्कायजं
तथा॥कार्त्तिकव्रतिनंदृष्ट्वाविलयंयांतितत्क्षणात्॥कार्त्तिकव्रतिनःपुंसोविष्णुवाक्यप्रणोदिताः॥रक्षांकुर्व
तिशक्राद्यागजानंकिंकरायथा॥विष्णुव्रतकरोनित्यंयत्रतिष्ठतिपूजितः॥ग्रहभूतपिशाचाद्यानैवतिष्ठंति
तत्रवै॥कार्त्तिकव्रतिनःपुण्यंयथोक्तव्रतकारिणः॥[illegible]स्वपंदुष्कृतंकिंचिन्मनो[illegible]नसमर्थोनवेद्वक्तुंब्रह्मा
पीहचतुर्मुखः॥श्रीनारदउवाच॥ ॥विष्णुप्रियंसकलकल्मषनाशनंचसत्पुत्रपौत्रधनधान्यसमृद्धिकारि॥ऊर्ज
व्रतंसनियमंकुरुतेमनुष्यःकिंतस्यतीर्थपरिशीलनसेवयाच॥इतिश्रीपद्मपुराणेकार्त्तिकमाहात्म्येसप्तमोध्यायः

Indira Gandhi National
Centre for the Arts

श्रीनारद उवाच॥ अथोर्जव्रतिनः सम्यगुद्यापनविधिं नृप॥ तच्छृणुष्व मयाख्यातं सविधानं समासतः॥ ऊर्जशु
क्लचतुर्दश्यां कुर्यादुद्यापनं व्रती॥ व्रतसंपूर्णतार्थाय विष्णुप्रीत्यर्थमेव च॥ तुलस्युपरिष्टात्तु कुर्यान्मंडपिकां शुभां
सतोरणां चतुर्द्वारां पुष्पचामरशोभितां॥ द्वारेषु द्वारपालांश्च पूजयेन्मृन्मयान्पृथक्॥ पुण्यशीलं सुशीलं च जयं
विजयमेव च॥ तुलसीमूलदेशे तु सर्वतोभद्रसंज्ञितं॥ चतुर्भिर्वर्णकैः सम्यक्कृत्वा ताढ्यं समलंकृतं॥ तस्योपरि
ष्टात्कलशं पंचरत्नसमन्वितं॥ महाफलेन स्थगितं भूतं तत्र निधाय च॥ पूजयेत्तत्र देवेशं शंखचक्रगदाधरं॥
कौशेयपीतवसनं युक्तं जलधिकन्यया॥ [illegible] इंद्रादिलोकपालांश्च मंडपे पूजयेद्बु
ती॥ द्वादश्यां प्रतिबुद्धोसौ त्रयोदश्यां यतः सुरैः॥ दृष्टोर्चितश्चतुर्दश्यां तस्मात्पूज्यस्तिथौ विधिः॥ तस्यामुपवसेद्भ
क्त्या शांतः प्रणतमानसः॥ पूजयेद्देवदेवेशं सौवर्णं गुर्वनुज्ञया॥ उपचारैः षोडशभिर्नानाभक्ष्यसमन्वितैः॥ रा
त्रौ जागरणं कुर्याद्गीतवाद्यादिमंगलैः॥ गीतं कुर्वंति ये भक्त्या जागरे चक्रपाणिनः॥ जन्मांतरशतोद्भूतैर्मु
क्ताः पापसंचयैः॥ नराणां जागरे विष्णोर्गीतं नृत्यं प्रकुर्वतां॥ गोसहस्रं ददतां समं फलमुदाहृतं॥ गीतनृत्या ८
दिकं कुर्वन्दर्शयन्कौतुकानि च॥ पुरतो वासुदेवस्य रात्रौ या हरिजागरे॥ पठन्विष्णुचरित्राणि यो रंजयति वै
ष्णवान्॥ मुखेन कुरुते वाद्यं स्वेच्छालापांश्च दर्शयेत्॥ भावैरेतैर्नरो यस्तु कुरुते हरिजागरं॥ दिने दिने तस्य

पुण्यं तीर्थकोटिसमं स्मृतं॥ ततस्तु पौर्णमास्यां तु सपत्नीकान्द्विजोत्तमान्॥ त्रिंशन्मितान्यथैकं वा स्वशक्त्या वा निमंत्रयेत्॥ वरा
न्नेत्वा यजेद्विष्णुर्मत्स्यरूपी जवन्नत॥ अस्यां दत्तं हुतं जप्तं तदक्षयफलं स्मृतं॥ अतस्तान्भोजयेद्धि प्रातः पायसान्नादि
ना व्रती॥ अतो देवा इति द्वाभ्यां जुहुयात्तिलपायसं॥ प्रीत्यर्थं देवदेवस्य देवानां च पृथक्पृथक्॥ दक्षिणां च यथाशक्ति दद्यात्प्रण
म्य तान्॥ पुनर्देवं समभ्यर्च्य देवीं चैव तुलसीं तथा॥ ततो गां कपिलां तत्र पूजयेद्विधिवद्व्रती॥ गुरुं व्रतोपदेष्टारं वस्त्रालंक रात्रि ३
रणादिभिः॥ सपत्नीकं समभ्यर्च्य तांश्च विप्रान्क्षमापयेत्॥ युष्मत्प्रसादाद्देवेशः प्रसन्नोस्तु सदा मम॥ व्रतादस्माच्च यत्पा
पं सप्तजन्मकृतं मयि॥ तत्सर्वं नाशमायातु स्थिरा मे चास्तु संततिः॥ मनोरथाश्च सफलाः संतु नित्यं ममाद्य या॥ देहांते वै
ष्णवं स्थानं प्राप्नुयां चातिदुर्लभं॥ इति क्षमाप्य तान्विप्रान्प्रसाद्य च विसर्जयेत्॥ तामर्चां गुरवे दद्याद्दक्षिणायुक्तां तदा व्र
ती॥ एवं यः कुरुते सम्यक्कार्तिकस्य व्रतं नरः॥ विपाप्मा सर्वभोगाढ्यो विष्णुसान्निध्यगो भवेत्॥ सर्वव्रतैः सर्वतीर्थैः स
र्वदानैश्च यत्फलं॥ तत्कोटिगुणितं ज्ञेयं सम्यगस्य विधानतः॥ ते धन्यास्ते सदा पूज्यास्तेषां च सफलोदयः॥ क्व यास्या
मो भवत्येषां दृढमूर्जव्रतं कलौ॥ इत्यूर्जव्रतनियमाः शृणोति भक्त्या या वा तत्कथयति वैष्णवाग्रे हि॥ तावुभयश्च
तक्रतुफलं लभेते तद्ध्यात्कलुषविनाशनं लभेते॥ ॥इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये अष्टमोऽध्यायः॥
श्रीपृथुरुवाच॥ यत्त्वया कथितं ब्रह्मन्व्रतमूर्जस्य विस्तरात्॥ तत्र या तुलसीमूले विष्णोः पूजा च योदिता॥ तेनाहं
ततः सुहृद्बंधुसंयुतः स्वयं भुंजीत भक्तिमान्॥ कार्तिके वाथ महति विधिरेषः परः स्मृतः॥ ॥श्री ॥रङ्घौउवाच॥ ५४

Indira Gandhi National Centre for the Arts

ष्टुमिच्छामि माहात्म्यं तुलसीत्त्वं॥ कथं सा ति प्रिया तस्य देवदेवस्य शार्ङ्गिणः॥ कथमेषा समुत्पन्ना कस्मिन्स्थाने च नारद॥
एतद्वदस्व समासेन सर्वज्ञोसि मतो मम॥ ॥श्रीनारद उवाच॥ शृणु राजन्प्रवदितो माहात्म्यं तुलसीत्त्वं॥ सेतिहासं पु
रावृत्तं तत्सर्वं कथयामि ते॥ पुरा शक्रः शिवं द्रष्टुमगात्कैलासपर्वतं॥ सर्वदैवैः परिवृतं मरुद्गणसेवितं॥ यावच्छतः शि
वगृहं तावत्तत्र स दृष्टवान्॥ पुरुषं भीमकर्माणं दंष्ट्रानयनभीषणं॥ स दृष्ट्वा तं न कस्त्वं भो कुतो गतो जगदीश्वरः॥ एवं
पुनः पुनः पृष्टः स यदा नो विवान्नृप॥ ततः क्रुद्धो वज्रपाणिस्तं निर्भर्त्स्य वचोब्रवीत्॥ इंद्र उवाच॥ रे मया पृष्टकमाणे पि नो
त्तरं दत्तवानसि॥ अतस्त्वां हन्मि वज्रेण कस्त्वां त्राता सि दुर्मते॥ श्रीनारद उवाच॥ ॥इत्युदीर्य ततो वज्री वज्रेणास्य दन
दद॥ तेनास्य कंठे नीलत्वं मगाद्वज्रं च भस्मतां॥ ततो रुद्रः प्रजज्वाल तेजसा प्रज्वलन्निव॥ दृष्ट्वा बृहस्पतिस्तूर्णं कृतांजलि
पुटोस्तवत्॥ इंद्रं च दंडवद्भूमौ कृत्वा स्तोतुं प्रचक्रमे॥ ॥बृहस्पतिरुवाच॥ नमो देवाधिदेवाय त्र्यंबकाय कपर्दिने॥ त्रिपुरघ्ना
य शर्वाय नमोंधकनिषूदिने॥ विरूपाय विरूपाय [illegible] बहुरूपाय शंभवे॥ यज्ञविध्वंसकर्त्रे च यज्ञानां फलदायिने॥
कालांतकाय कालाय कालकृतोभिधराय च॥ नमो ब्रह्मशिरोहर्त्रे ब्रह्मण्याय नमो नमः॥ श्रीनारद उवाच॥ ॥एवं स्तुतस्ततः
स्तु धिषणेन जगाद हसन्हरन्नयनज्वालां त्रिलोकीनयनकृशां॥ ईश्वर उवाच॥ वरं वरय नो ब्रह्मन्प्रीतस्तस्मान्नया तव॥
इंद्रस्य जीवदानेन जीवेनत्वं प्रथां द्विज॥ ॥बृहस्पतिरुवाच॥ ॥यदि तुष्टोसि देवत्वं पाहींद्रं शरणागतं॥ अग्निरेष शमं यातु ना
लनेत्रः समुद्भवः॥ ईश्वर उवाच॥ पुनः प्रवेशमायाति भाललनेत्रे कथं शिखी॥ एवं त्यक्ष्याम्यहं दूरे यथेंद्रं नैष पीडयेत्॥ श्रीनार



रद उवाच॥ इत्युक्त्वा तं करे धृत्वा प्राक्षिपल्लवणांभसि॥ सोपतत्सिंधुगंगायाः सागरस्य च संगमे॥ तावत्स बालरूपत्वमगात्त
त्र रुरोद च॥ रुदतस्तस्य शब्देन प्राकंपद्धरणी मुहुः॥ स्वर्गश्च सत्यलोकांताः स्वनाद्बधिरीकृताः॥ श्रुत्वा ब्रह्मा ययौ तत्र कि
मेतदिति विस्मितः॥ तावत्समुद्रस्योत्संगे तं बालं स ददर्श ह॥ दृष्ट्वा ब्रह्माणमायांतं समुद्रोपि कृतांजलिः॥ प्रणम्य शिरसा
बालं तस्योत्संगे न्यवेशयत्॥ भो ब्रह्मन्सिंधुगंगायां जातोयं मम पुत्रकः॥ जातकर्मादिसंस्कारान्कुरुष्वास्य जगद्गुरो
॥श्रीनारद उवाच॥ इत्थं वदति पाथोधौ स बालः सागरात्मजः॥ ब्रह्माणमगृहीत्कूर्चे विधुन्वंतं मुहुर्मुहुः॥ धुन्वतस्तस्य
कूर्चं तन्नेत्राभ्यामगमज्जलं॥ कथं विमुक्तकूर्चो ब्रह्मा प्रोवाच सागरं॥ नेत्राभ्यां विधृतं यस्मादनेनेतज्जलं मम॥ त
स्माज्जलंधर इति ख्यातो नाम्ना भवत्वसौ॥ अधुनापि एष तरुणः सर्वशास्त्रास्त्रपारगः॥ अवध्यः सर्वभूतानां वि
ना रुद्रं भविष्यति॥ यत एव समुद्भूतस्तत्रैवांते गमिष्यति॥ श्रीनारद उवाच॥ ॥इत्युक्त्वा शुक्रमाहूय राज्ये तं चाभ्यषेच
यत्॥ आमंत्र्य सरितां नाथं ब्रह्मांतर्द्धानमागमत्॥ अथ तद्दर्शनोत्फुल्लनयनः सागरस्तदा॥ कालनेमिसुतां वृंदां
तद्भार्यार्थमयाचत॥ ते कालनेमिप्रमुखास्ततोसुरास्तस्मै सुतां तां प्रददुः प्रहर्षिताः॥ स चापि संप्राप्य सुहृद्वरा
न्वशी सशास सगां शुक्रसहायवान्बली॥ इति श्रीपद्मपुराणे जलंधरोपाख्याने नवमोध्यायः॥ ॥श्रीनारद उवाच॥
ये देवैर्निर्जिताः पूर्वं दैत्याः पातालसंस्थिताः॥ ते पि तन्मंडलं याता निर्भयास्तमुपाश्रिताः॥ कदाचिच्छिन्नशिरसं दृष्ट्वा रा
हुं स दैत्यराट्॥ पप्रच्छ भार्गवं तस्य शिरश्छेदनकारणं॥ स शशंस समुद्रस्य मथनं देवकारितं॥ रत्नानां हरणं चैव दैत्यानां

Indira Gandhi National Centre for the Arts

चपराजवं॥ स श्रुत्वा क्रोधरक्ताक्षः स्वपितुर्मथनं तदा॥ दूतं संप्रेषयामास घस्मरं शक्रसन्निधौ॥ दूतस्त्रिविष्टपं गत्वा सुध
र्मां प्राविशत्त्वरात्॥ गर्वाद् खर्वमौलिः स तु देवेंद्रं वाक्यमब्रवीत्॥ घस्मर उवाच॥ ॥जलंधरोब्धितनयः सर्वदैत्यजनेश्वरः॥
दूतोहं प्रेषितस्तेन स यदाह श्रृणु घातक॥ कस्मात्त्वया मम पिता मथितः सागरोद्रिणा॥ नीतानि सर्वरत्नानि तानि शी
घ्रं प्रयच्छ नः॥ ॥श्रीनारद उवाच॥ ॥इति दूतवचः श्रुत्वा विस्मितस्त्रिदशाधिपः॥ उवाच संस्मरन्तुडं भयरोषसमन्वितः॥
इंद्र उवाच॥ श्रृणु दूत मया सर्वं मथितः सागरो यथा॥ अद्रयो मद्भयत्रस्ताः स्वकुक्षिस्थाः कृतास्तदा॥ अन्येपि मद्द्वि
षस्तेन रक्षिता दितिजाः पुरा॥ तस्मात्तद्रत्नजातं तु मया व्यपहृतं किल॥ शंखोप्येवं पुरा देवान् द्विषन् सागरात्मजः॥ म
मानुजेन निहतः प्रविष्टः सागरोदरं॥ तद्गच्छ कथयस्वास्य सर्वं मंथनकारणं॥ ॥श्रीनारद उवाच॥ इत्थं विसर्जितो दू
तस्तदेंद्रेणागमद्द्रुतं॥ तदिदं वचनं सर्वं दैत्याय कथयत्तदा॥ तन्निशम्य तदा दैत्यो रोषात्प्रस्फुरिताधरः॥ उद्योगमक
रोत्तूर्णं सर्वदेवजिगीषया॥ तदोद्योगसुरेंद्रस्य दिग्भ्यः पातालतस्तथा॥ दितिजाः प्रत्यपद्यंत कोटिशः कोटिशस्तथा॥
१४ अथ शुंभनिशुंभाद्यैर्बलाधिपतिकोटिभिः॥ गत्वा त्रिविष्टपं दैत्यो नंदनाधिष्ठितोभवत्॥ निर्ययुस्त्वमरावत्या देवायु
द्धाय दंशिताः॥ पुरमावृत्य तिष्ठंतं दृष्ट्वा दैत्यबलं महत्॥ ततः समभवद्युद्धं देवदानवसेनयोः॥ मुशलैः परिघैर्बाणैर्गदाभिः
परस्वधैः॥ तेन्योन्यं समधावेतां जघ्नतुश्च परस्परं॥ तत्क्षणेनाभवत्सेना रुधिरौघप्रवर्षिणी॥ पतितैः पात्यमानैश्च गजाश्वरथ
पत्तिभिः॥ व्यराजत रणे भूमिः संध्याभ्रपटलैरिव॥ तत्र युद्धमृतान्दैत्यान्भार्गवः समुदतिष्ठत॥ विद्यया मृतसंजीविन्या

मंत्रितैस्तोयबिंदुभिः॥ देवानपि हतान्युद्धे तत्राजीवयदंगिराः॥ दिव्यौषधीः समानीय द्रोणाद्रेः स पुनःपुनः॥ दृष्ट्वा देवान्स
मायुद्धे पुनरेव समुत्थितान्॥ जलंधरः क्रोधवशो भार्गवं वाक्यमब्रवीत्॥ ॥जलंधर उवाच॥ मया युद्धे हता देवा उत्तिष्ठंते क
थं पुनः॥ न वयं जीविनी विद्या नैवान्यत्रेति न श्रुतं॥ ॥शुक्र उवाच॥ ॥दिव्यौषधीः समानीय द्रोणाद्रेंगिराः सुरान्॥
जीवयत्येव तच्छीघ्रं द्रोणाद्रिमुपाहर॥ ॥श्रीनारद उवाच॥ ॥इत्युक्तः स तु दैत्येंद्रो नीत्वा द्रोणाचलं तदा॥ प्राक्षिप
त्सागरे तूर्णं पुनरागान्महाहवं॥ अथ देवान्हतान्दृष्ट्वा द्रोणाद्रिमगमद्गुरुः॥ तावत्तत्र गिरींद्रं तं न ददर्श सुरार्चितः॥ ज्ञात्वा
दैत्यैर्हृतं द्रोणं धिषणो भयविह्वलः॥ आगत्य दूराद्व्याजह्रे श्वासाकुलितविग्रहः॥ ॥बृहस्पतिरुवाच॥ ॥पलाय
ध्वं महादेवा नजयत्नुं क्षमापियन्॥ रुद्रांशसंभवो ह्येषः स्मरध्वं शक्रचेष्टितं॥ ॥श्रीनारद उवाच॥ श्रुत्वा तद्वचनं देवा भय
विह्वलितास्तदा॥ दैत्यैर्वध्यमानाश्च पलायंत दिशो दश॥ देवान्विद्रावितान्दृष्ट्वा ततः सागरनंदनः॥ शंखभेरीजयरवैः
प्रविवेशामरावतीं॥ प्रविष्टे नगरीं दैत्ये देवाः शक्रपुरोगमाः॥ सुवर्णाद्रिगुहां प्राप्ता न्यवसन्दैत्यतापिताः॥ ततः सर्वे
ष्वसुराधिकारेष्विंद्रादिकानां विनिवेशयत्तदा॥ शुंभादिकान्दैत्यवरान्पृथक् पृथक् स्वयं सुवर्णाद्रिगुहामगात्सु
रः॥ ॥इति श्रीपद्मपुराणे पातालखंडे कार्तिकमाहात्म्ये जलंधरोपाख्याने दशमोध्यायः॥ ॥श्रीनारद उवाच॥ ॥पु
नर्दैत्यं समायांतं दृष्ट्वा देवाः सवासवाः॥ भयप्रकंपिताः सर्वे विष्णुं स्तोतुं प्रचक्रमुः॥ ॥देवा ऊचुः॥ नमो मत्स्यकू

Indira Gandhi National
Centre for the Arts

दैत्यसंतापिता२

॥श्रीभगवानुवाच॥६

र्भादिनानास्वरूपैःसदातत्तत्कार्योद्यतायाऽखिलंते॥विधात्रादिसर्गस्थितिध्वंसकर्त्रेगदाशंखपद्मारिहस्तायतेस्तु॥र
मावल्लभायासुराणांनिहंत्रेभुजंगारियानायपीतांबराय॥मखादिक्रियापाककर्त्रेविहंत्रेशरण्यायतस्मैनतास्मो
नतास्म॥नमोमर्त्यदुःखावलध्वंसदंत्रेलयेविप्लवेजिष्णवेते॥भुजंगेशतल्पायनाथार्कचंद्राग्निनेत्रायतस्मैनना
स्मोनतास्म॥ ॥श्रीनारदउवाच॥ ॥संकष्टनाशनंनामस्तोत्रमेतत्पठेन्नरः॥सकदाचिन्नसंकष्टैःपीड्यतेकृप
याहरेः॥इतिदेवास्तुतिंयावत्कुर्वंतिदनुजद्विषः॥तावत्सुराणामापत्तिर्विदिताविष्णुनातदा॥सहसोत्थायदैत्यारिःकृप
यादिव्यमानसः॥आरुह्यगरुडंवेगाल्लक्ष्मीवचनमब्रवीत्॥जलंधरेणतेभ्रात्रादेवानांकदनंकृतं॥तेनाहंतोगमि
ष्यामियुद्धायत्वरान्वितः॥श्र[illegible]श्रीरुवाच॥ ॥अहंतेवल्लभानाथभक्ताचयदिसर्वदा॥तत्क
थंतेममभ्राताभ्रुद्धव्यःकृपानिधे॥ ॥श्रीभगवानुवाच॥रुद्रांशसंभवत्वाच्चब्रह्मणोवचनादपि॥प्रीत्याचतव
जलंधरस्य नैवायंममवध्यो[illegible]॥ ॥श्रीनारदउवाच॥ ॥इत्युक्त्वागरुडारूढःशंखचक्रगदासि[illegible]त॥विष्णुर्वेगाद्ययौ
युद्धंयत्रदेवास्थवंतिते॥अथारुणानुजजवात्पक्षवातप्रपीडिताः॥वात्याविवर्त्तितादैत्याबभ्रमुःखेयथाघनाः॥ ११
ततोजलंधरोदृष्ट्वादैत्यान्वात्याप्रपीडितान्॥उद्धृत्यनयनेक्रोधात्ततोविष्णुंसमभ्ययात्॥ततःसमभवद्युद्धंविष्णु
दैत्ययोर्महत्॥आकाशंकुर्वतोर्बाणैस्तत्रनिरवकाशवत्॥विष्णुर्दैत्यस्यबाणौघैर्ध्वजंछत्रंधनुःहयान्॥

चिच्छेदतंचहृदयेबाणेनैकेनताडयत्॥ततोदैत्यःसमुत्पत्यगदापाणिस्त्वरान्वितः॥आहत्यगरुडंमूर्ध्निपातयामासभू
तले॥विष्णुर्गदांस्वखड्गेनचिच्छेदप्रहसन्निव॥तावत्सहृदयेविष्णुंजघानदृढमुष्टिना॥ततस्तौबाहुयुद्धेनयु
युधातेपरस्परं॥बाहुभिर्मुष्टिभिश्चैवजानुभिर्नादयन्महीं॥एवंतौसुचिरंयुद्धंकृत्वाविष्णुःप्रतापवान्॥उ
वाचदैत्यराजानंमेघगंभीरनिस्वनः॥ ॥श्रीविष्णुरुवाच॥ ॥वरंवरयदैत्येंद्रप्रीतोस्मितवविक्रमात्॥अदेय
मपितेदास्यामियत्तेमनसिवर्त्तते॥ ॥जलंधरउवाच॥यदिभावुकतुष्टोसिवरमेनंददस्वमे॥मद्भगिन्यासहत्वयामद्गेहेस
गणोवस॥श्रीनारदउवाच॥तथेत्युक्त्वासभगवान्सर्वदेवगणैःसह॥जालंधरंनामपुरमगमद्रमयासह॥जलंधरस्तुदे
वानामधिकारेषुदानवान्॥स्थापयित्वासहर्षःसन्सुनरागान्महीतले॥स्थापयित्वासरोषादीनानयद्भूतलेबली॥देव
गंधर्वसिद्धाद्यान्यच्चराक्षसमानुषान्॥स्वपुरेनागरांश्चक्रे[illegible]भुवनत्रये॥एवंजलंधरःकृत्वादेवान्स्ववश
वर्तिनः॥धर्मेणपालयामासप्रजाःपुत्रानिवौरसान्॥नकश्चिद्व्याधितोनैवदुःखितोनकृशस्तथा॥नदीनोदृश्यतेत
स्मिन्धर्माद्राज्यंप्रशासति॥ ॥श्रीनारदउवाच॥एवंमहींशासतिदानवेंद्रेधर्मेणसम्यक्सयदृच्छयाहं॥कदाचिदा
गामयतस्त्वल्लक्ष्मीविलोकितुंश्रीरमणंचसविष्णुं॥ ॥इतिश्रीपद्मपुराणेपातालखंडेकार्तिकमाहात्म्येजलंध
रोपाख्यानेएकादशोध्यायः॥ ॥श्रीनारदउवाच॥ ॥समाहूयनिधिवदानवेंद्रोतिविक्रमान्॥संग्रहस्यतदावा



Indira Gandhi National
Centre for the Arts

कांत्वं गादन्यसत्तम॥ ॥जलंधर उवाच॥ कुतः आगम्यते ब्रह्मन् किं च दृष्टं त्वया क्वचित्॥ यदर्थमिह वायातस्तदाज्ञाप
यमां मुने॥ ॥श्रीनारद उवाच॥ ॥गतः कैलासशिखरं दैत्येंद्राहं यदृच्छया॥ तत्रो मया सहासीनं दृष्टवानस्मि शं
करं॥ योजनायुतविस्तीर्णे कल्पवृक्षमहावने॥ कामधेनुशतोत्कीर्णे चिंतामणिसुदीपिते॥ तं दृष्ट्वा महदाश्चर्य
वितर्को मे त्वभूत्तदा॥ क्वापीदृशी नवेद्धिः स्यात्रिलोक्यां वा न वेति व ता वत्स्वापि दैत्येंद्र समृद्धिः संस्मृता मया॥ तद्वि
लोकनकामोऽहं त्वत्सांनिध्यमिहागतः॥ त्वत्समृद्धिमिमां पश्यन् स्त्रीरत्नरहितां ध्रुवं॥ तर्कयामि शिवादन्यत्रै
लोक्यां न समृद्धिमान्॥ अप्सरो नागकन्याद्या यद्यपि बहवो स्थिताः॥ तथापि तावत्या वल्या रूपेण सदृशा ध्रुवं
यस्या लावण्यजलधौ निमग्नश्चतुराननः॥ स्ववीर्यमुमुचुस्तस्मात् तया कान्त्योपमीयते॥ वीतरागोऽपि हि यथा मदना
रिः स्वलीलया॥ सौंदर्यगहने त्वाम्यन् राजरी रूपया पुरा॥ निष्कामः कामयुक्तोऽपि स्ववशोऽपि वशीकृतः॥ यस्याः
पुनः पुनः पश्यइ पं धाता विसर्जने। स सर्जाप्सरसस्तासां तत्समेकापि नाभवत्॥ अतः स्त्रीरत्नसंज्ञो कुः समृद्धि
१ स्तस्य सा वरा॥ तथा न तव दैत्येंद्र सर्वरत्नाधिपस्य च॥ श्रीनारद उवाच॥ ॥एवमुक्त्वा तमामंत्र्य गते मयि स दैत्यराट् १२
तद्रूपश्रवणादासीदनंगज्वरपीडितः॥ अथ संप्रेषयामास स दूतं सिंहिकासुतं॥ त्र्यंबकाय तदा किं विद्धि सुमायां
विमोहितः॥ कैलासमगमद्राहुः कुर्वन्नस्रु चंद्रं दुवर्हसं॥ कांत्येन ... पद्मेंदुवर्चसं स्वांगजेन तां॥ निवेदि

१ विश्वतंत्रोऽपि हियतः स्वात्मनो वशगाः कृतगा॥ ५

तस्मादीशायनं दिनाप्राविवेश सः॥ त्र्यंबकन्नलतासंज्ञाप्रेरितो वाक्यमब्रवीत्॥ राहुरुवाच॥ ॥देवपन्नगसेव्यस्य
त्रैलोक्याधिपतेस्तथा॥ सर्वरत्नेश्वरस्यत्वं मारोषं शृणु वृषध्वज॥ श्मशानवासिनो नित्यमस्थिमालाधरस्य च॥
दिगंबरस्य ते नार्या कथं हैमवती शुभा॥ अहं रत्नाधिनाथोऽस्मि सा च स्त्रीरत्नसंहिता॥ तस्मान्ममैव सा योग्या नैव
भिक्षाशिनस्तव॥ श्रीनारद उवाच॥ वदत्येवं तदा राहौ भ्रूमध्याच्छूलपाणिनः॥ अभवत्पुरुषो रौद्रस्तीव्राशनि
समप्रभः॥ सिंहास्यः प्रललज्जिह्वः सज्वालनयनो महान्॥ ऊर्ध्वकेशः शुष्कतनुर्नृसिंह इव चापरः॥ स तं खा
दितुमायांतं दृष्ट्वा राहुर्भयातुरः॥ पलायदतिवेगेन बहिः स वदधावत॥ धृत्वा खादितुमारब्धं स्तावद्रुद्रेण वारितः
नैवासौ वध्यतामेति दूतोऽयं परवानिति॥ मुंचेति पुरुषः श्रुत्वा राहुं तत्याज सोऽम्बरे॥ राहुं त्यक्त्वा स पुरुषस्तदा रुद्रं
व्यजिज्ञपत्॥ ॥पुरुष उवाच॥ ॥क्षुधा मां बाधते स्वामिन् क्षुत्क्षामोऽस्मि सर्वथा॥ किं तत्कृत्ये हं देवत्वात्तदाज्ञाप
य मां विभो॥ ॥ईश्वर उवाच॥ ॥भक्षयस्वात्मनः शीघ्रं मांसं त्वं हस्तपादयोः॥ श्रीनारद उवाच॥ स शिवेनैव मादृ
ष्टस्तु खादत्पुरुषस्स्वकं॥ हस्तपादोद्भवं मांसं शिरःशेषो यथाभवत्॥ दृष्ट्वा शिरोवशेषं तु सुप्रसन्नः सदाशिवः॥
उवाच भीमकर्माणं पुरुषं जातविस्मयः॥ श्रीमहादेव उवाच॥ त्वं कीर्तिमुखसंज्ञो हि भव मद्द्वारगः सदा॥ त्वदर्चां ये
न कुर्वंति नैव ते मत्प्रियंकराः॥ तदाप्रभृति देवेशद्वारे कीर्तिमुखः स्थितः॥ नार्चयंति ये पूर्वं तेषां पूजा वृथा भवेत्॥

Indira Gandhi National
Centre for the Arts

॥श्रीनारद उवाच॥ राहुर्विमुक्तो यस्तेन सो पतद्बर्बरस्थले॥ अतः स बर्बरोद्भूत इति ख्यातिं गतः॥ ततः स राहुः पुनरेव जातमा
त्मानमस्मिन्निति मन्यमानः॥ समेत्य सर्वं कथयांबभूव जलंधराय स्वविचेष्टितं तत्॥ ॥इति श्रीपद्मपुराणे कार्त्तिक
माहात्म्ये जलंधरोपाख्याने द्वादशोऽध्यायः॥ ॥श्रीनारद उवाच॥ ॥जलंधरस्ततः श्रुत्वा कोपाकुलितविग्रहः॥ निर्जगाम
महादैत्यानां कोटिभिः परिवारितः॥ गच्छतस्त्वग्रतस्तस्य शुक्रो राहुर्दृशोऽस्थितो भवत्॥ मुकुटश्चापतद्भूमौ वेगात्प्रस्ख
लितस्तदा॥ दैत्यसैन्यावृते तस्य विमानानां नभो ततस्तथा॥ अथ राज्यतनतः पूर्वं प्राहृषीव यथा घनैः॥ तस्योद्योगं त
दा दृष्ट्वा देवाः शक्रपुरोगमाः॥ अलक्षिताः स्वरा जग्मुः स्तुतिं तेऽथ जिष्णुपन्॥ ॥देवा ऊचुः॥ नजानाः सकथं स्वामिन्
देवा पश्मिमिमांविनो॥ तदस्मद्रक्षणार्थाय जहि सागरनंदनं॥ ॥श्रीनारद उवाच॥ ॥इति देववचः श्रुत्वा प्रदस्य वृष
न्त ध्वजः॥ महाविष्णुं समाहूय वचनं चेदमब्रवीत्॥ ॥ईश्वर उवाच॥ ॥जलंधरः कथं विष्णो न हतः संगरे त्वया॥ तद्ग
त्वा पि यातोसि त्वं स्वकं वैकुंठमात्मनः॥ ॥श्रीविष्णुरुवाच॥ ॥तवांशसंभवत्वाच्च भ्रातृत्वाच्च तथा श्रियः॥ नम
न३. या निहतः संख्ये त्वमेनं जहि दानवं॥ ॥श्रीईश्वर उवाच॥ ॥नायमेभिर्महातेजाः शस्त्रास्त्रैर्वध्यते मया॥ देवैः सह १३
स्वतेजांशं शस्त्रार्थं दीयतां मम॥ ॥श्रीनारद उवाच॥ ॥अथ विष्णुमुखा देवाः स्वतेजांसि ददुस्तदा॥ तान्येकमाग
तानीशो दृष्ट्वा स्वं चासृजन्महः॥ तेनाकरोन्महादेवः सहसा शस्त्रमुत्तमं॥ चक्रं सुदर्शनं नाम तेजोज्वालाति



भीषणं॥ तेजः शेषेण च तथा वज्रं चकृतवान्हरः॥ तावज्जलंधरो दृष्टः कैलासतलमभि सु॥ दैत्यश्वरथपत्तीनां
कोटिभिः परिवारितः॥ तं दृष्ट्वा लक्षिता जग्मुर्देवाः सर्वे यथागताः॥ गणाश्च समनह्यंत युद्धाय तीव्रगान्विताः॥
नंदीनमुखसेनानीमुख्येनानी मुखाः सर्वे शिवाज्ञया॥ अवतेरुर्गणा वेगात्कैलासाद्युद्धदुर्मदाः॥ ततः
समभवद्युद्धं कैलासोपत्यकासु वै॥ प्रमथाधिपदैत्यानां घोरं शस्त्रास्त्रसंकुलं॥ भेरीमृदंगशंखौघैर्भिः स्व
नैर्वीरहर्षणैः॥ गजाश्वरथशब्दैश्च नादितान्स्वर्थकंपत॥ शक्तितोमरबाणौघमुशलप्रासपट्टिशैः॥ व्यराजत न
भः पूर्णमुल्काभिरिव संवृतं॥ निहतै रथनागाश्वपत्तिभिर्व्यराजत॥ वज्राहताचलशिरः शाकलैरिव संवृता
॥प्रमथाहतदैत्यौघैर्दैत्याहतगणैस्तथा॥ वसास्रङ्मांसपंकाढ्या तत्रगम्या न चाभवत्॥ प्रमथाहतदैत्यौघान्त्वा
र्गवः समजीवयत्॥ युद्धे पुनः पुनः स्तत्र मृतसंजीविनीबलात्॥ तं दृष्ट्वा व्याकुलीभूता गणाः सर्वे भयान्विताः॥
शशंसुर्देवदेवाय तं सर्वं शुक्रचेष्टितं॥ अथ रुद्रमुखात्कृत्या बभूवातीव भीषणा॥ तालजंघोदरी वक्त्रास्तनापा
दितनुरुहा॥ सा युद्धभूमिमासाद्य भक्षयंती महासुरान्॥ भार्गवं तं गृहीत्वा जगामांतर्हिता नभः॥ विधृतं भार्गवं
दृष्ट्वा दैत्यसेनागणास्तदा॥ प्रम्लानवदनाहर्षान्निजघ्नुर्युद्धदुर्मदाः॥ अथ्यानडुपत दैत्यानां सेनागणा नय
हितौ॥ निशुंभः शुंभ सेनान्यो कालनेमिश्च वीर्यवान्॥ यत्रास्ते वारयामासुर्गणसेना महाबलाः॥ मुंचंतः
शरवर्षाणि प्रावृषीव बलाहकाः॥ ततो दैत्यशरौघास्ते शलभानामिव व्रजाः॥ रुरुधुः प्रदिशः सर्वा गणास्ते



Indira Gandhi National
Centre for the Arts

कृंप

नामपूर्जिता॥ गणाः शरशतैर्भिन्ना रुधिरासारवर्षिताः॥ वसंते किंशुकाजातासनप्राज्ञायंत किंचन॥ पतिताःपा
त्यमानाश्च छिन्ना भिन्नास्तथा गणाः॥ वसंते किंशुकाजातासानप्राज्ञायंत किंचन॥ त्यक्त्वा संग्राममत्र भिंते
सर्वेपि विमुखाजाताः॥ ॥श्रीनारदउवाच॥ ततः प्रनष्टं सबलं विलोक्य च लंबोदरकार्त्तिकेयाः॥ त्वरा
न्विता दैत्यवरान्ससत्य निवारयामासुरमर्षणास्ते॥ ॥इतिश्रीपद्मपुराणे कार्त्तिकमाहात्म्ये जलंधरो
पाख्याने त्रयोदशोध्यायः॥ श्रीनारदउवाच॥ ते गणाधिपतिं दृष्ट्वा नंदीनमुखषण्मुखान्॥ अमर्षादभ्यधाव
तद्वंद्वयुद्धाय दानवाः॥ नंदिनं कालनेमिस्तु शुंभो लंबोदरं तथा॥ निशुंभः षण्मुखं वेगादभ्यधावत दंशि
ताः॥ निशुंभः कार्त्तिकेयस्य मयूरं पंचभिः शरैः॥ हृदि विव्याध वेगेन मूर्च्छितः स पपात ह॥ ततः शक्तिधरः शक्तिं
यावद्ग्राह रोषितः॥ तावन्निशुंभो वेगेन स्वशक्त्या तमपातयत्॥ ततो नंदी शरव्रातैः कालनेमिमविध्यत॥ सप्त
स्का॥४ भिश्च हयान्केतुमीषां सारथिमच्छिनत्॥ कालनेमिश्च संक्रुद्धो धनुश्चिच्छेद नंदिनः॥ तदपास्य सशूलेन तं वक्ष
स्याहनद्दृढं॥ सशूलभिन्नहृदयो हताश्वो हतसारथिः॥ अद्रेः शिखरमामुच्य शैलादिः सोप्यपातयत्॥ अथ शुंभ
गणेशौ वरथ मूषककवाहनौ॥ युध्यमानौ शरव्रातैः परस्परमविध्यतां॥ गणेशोथ तदा शुंभं हृदि विव्याध प १५
त्रिणा॥ सारथिं च त्रिभिर्हत्वा पातयामास भूतले॥ ततोतिक्रुद्धः शुंभोपि बाणवृष्ट्या गणाधिपं॥ मूषकं च
त्रिभिर्विद्ध्वा ननाद जलदस्वनः॥ मूषकः शरभिन्नांगश्चचाल द्रवेदनः॥ लंबोदरश्च पतितः पदातिरभवन्

पा॥ ततो लंबोदरः शुंभं हत्वा परशुणा हृदि॥ अपातयच्छरान्सोम मूषकं चारुहत्तुनः॥ कालनेमिर्निशुंभश्च उतो लंबो
दरं शरैः॥ युगपज्जघ्नतुः क्रोधात्तैरिव महाद्विपं॥ तं पीड्यमानमालोक्य वीरभद्रो महाबलः॥ अन्वधावत वेगे
न रुद्रकोटियुतस्तदा॥ कूष्मांडभैरवाश्चापि वेताला योगिनीगणाः॥ पिशाचा वा योगिनीसंघाः गृह्यापि तमन्वयु
त ३ ः॥ ततः किलकिलाशब्दैः सिंहनादैः सघर्घरैः॥ नादितो डमरुकैश्च पृथिवी समकंपत॥ ततो भूतान्यधावंत सन्हृयं॥ नंदी च कार्त्तिकेयश्च समाश्वस्तौ त्वरान्वितौ॥ निजघ्न
तीस्म दानवान्॥ उत्पतंत्यापतंति स्म ननृतुश्च रणे गणाः॥ व्याकुला सा च या सेना विषमवद्
भूरणे दैत्यान्निरंतरशरव्रजैः॥ छिन्नभिन्ना हतैर्दैत्यैः पतितै रुधिरोक्षितैः॥ हस्त्यश्वरथसं
नानवत्॥ प्रविध्वस्तां तदा सेनां दृष्ट्वा सागरनंदनः॥ रथेनातिपताकेन गणान्नभिययौ बली॥ धावा
हादः शंखभेरीरवस्तथा॥ अनवस्थितनादश्च सेनयोरुभयोस्तदा॥ जलंधरशरव्रातैर्नीहारपटलैरिव॥ द्यावा
पृथिव्यौ तदाच्छिन्नमंतरं समपद्यत॥ गणेशं पंचभिर्विद्ध्वा नंदिनं नवभिः शरैः॥ वीरभद्रं च विंशत्या ननाद जल
दस्वनः॥ कार्त्तिकेयस्तदा दैत्यं शक्त्या विव्याध सत्वरः॥ लुघूर्णश्च शक्तिनिर्भिन्नः किंचिद्व्याकुलमानसः॥ ततः
क्रोधपरीतात्मा कार्त्तिकेयं जलंधरः॥ गदया ताडयामास स च भूमितले पतत्॥ तथैव नंदिनं वेगाद्दपात
यत भूतले॥ ततो गणेश्वरः क्रुद्धो गदां परशुनाच्छिनत्॥ वीरभद्रस्त्रिभिर्बाणैर्हृदि विव्याध दानवं॥ सप्तभि
श्च हयान्केतुं धनुश्छत्रं च चिच्छिदे॥ ततः स क्रुद्धो दैत्येंद्रः शक्तिमुद्यम्य दारुणां॥ गणेशं पातयामास रथं वा

Indira Gandhi National Centre for the Arts

त्पमथारुह्य॥ अन्वधावत वेगेन वीरभद्रः रुषान्वितः॥ ततस्तौ सूर्यसंकाशौ युयुधाते परस्परं॥ वीरभद्रः पुनस्तस्य
हयान्बाणैरपातयत्॥ धनुश्चिच्छेद वै दैत्यः पुष्कुवपरिघायुधः॥ ॥श्रीनारद उवाच॥ ॥सवीरभद्रस्त्वरया जं
घानाभिगम्य दैत्यः परिघेण मूर्छितः॥ स चापि वीरः प्रविभिन्नमूर्ध्नीपपात भूमौ रुधिरं समुद्गिरन्॥ ॥इति
श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये जलंधरोपाख्याने चतुर्दशोऽध्यायः॥ श्रीनारद उवाच॥ ॥पतितं वीरभद्रं तु १५
दृष्ट्वा रुद्रगणा भयात्॥ आगच्छन्ति रणं हित्वा क्रोशमाना महेश्वरं॥ अथ कोलाहलं श्रुत्वा गणानां चंद्रशेख
रः॥ अन्वयाद्वृषमारूढः संग्राममप्रहसन्निव॥ रुद्रमायांतमालोक्य सिंहनादैर्गणाः पुनः॥ निवृत्ताः संगरे
दैत्यान्निजघ्नुः शरवृष्टिभिः॥ दैत्याश्च भीषणं रुद्रं दृष्ट्वा सर्वे विदुद्रुवुः॥ कालाग्निकमिव निर्दहंतं पातकानीव तं
द्रुपाणं॥ अथ जालंधरो दैत्यान्विद्रुतान्प्रेक्ष्य संगरे॥ चोषाद्धावद्वीरो मुंचन्बाणान्सहस्रशः॥ शुंभनिशुंभप्र
मुखाः कालनेमिबलाहकः॥ खड्गरोमा प्रचंडश्च घस्मराद्याः शिवं ययुः॥ बाणांधकारसंछिन्नं दृष्ट्वा गणावे
ष्टितं॥ तद्बाणजालं सम्माच्छिद्य स्वबाणैर्गणान्ततः॥ दैत्यांश्च बाणवात्याभिः पीडितानकरोत्तदा॥ प्रचंडबाणजालैर्घो
रैरपातयत भूतले॥ खड्गरोम्णः शिरः कायात्परशुनाच्छिनत्॥ बलाहकस्य शिरः खट्वांगेनाकरोद्द्विधा॥ बध्वा
च घस्मरं दैत्यं पाशेनास्य हनद्रुविः॥ वृषवेगहताः केचित्केचिद्बाणैर्निपातिताः॥ न शेकुरसुराः स्थातुं गजाः सिं
हार्दिता इव॥ ततः क्रोधपरीतात्मा वेगाद्रुद्रं जलंधरः॥ आह्वयामास समरे बाणानि समसृजनः॥ जालंधरस्तु



युद्धस्वाद्य मया सार्द्धं किमेभिर्निहतैरत्र॥ यच्च किंचिद्बलं तेस्ति तद्दर्शय जटाधर॥ ॥श्रीनारद उवाच॥ ॥इत्युक्त्वा
बाणैः स सप्तत्या जघान वृषभध्वजं॥ तानप्राप्तान्शितैर्बाणैश्चिच्छेद प्रहसन्शिवः॥ ततो हयान्धनु ... ऊं छत्रं ... छेद धनुश्चि
बाणैः स सप्तत्या ... बाणैरिन्द्र ... केतनं॥ नया
सहास्तिः॥ संछिन्नधन्वा विरथ आगदामुद्यम्य वेगवान्॥ अन्वधावच्छिवं तावद्रुद्रो बाणैश्छि... केतनं॥ तया
सहास्तिः॥ सच्छिन्नधन्वा विरथ आगदामुद्यम्य वेगवान्॥ अन्वधावच्छिवं तावद्रुद्रो बाणैश्छि...
विमुष्टिमुद्यम्य योरुद्रजिघांसया॥ तावच्छिवेन बाणौघैः क्रोशमात्रमपाकृतः॥ ततो जलंधरो दैत्यो ग
त्वा रुद्रं बलाधिकं॥ ससर्ज मायां गांधर्वीं मुह्यतो रुद्रमोहिनीं॥ ततो जगुश्च ननृतुर्गंधर्वाप्सरसां गणाः॥
तालवेणुमृदंगाश्च वादयंतिस्म वा परे॥ तं दृष्ट्वा महदाश्चर्यं रुद्रो नादविमोहितः॥ पतितान्यपि शस्त्राणि क
रस्थानि च वेत्ति सः॥ एकाग्रीभूतमालोक्य रुद्रं दैत्यो जलंधरः॥ कामार्तः स जगाम आशु यत्र गौरी स्थिता भवत्
युद्धे शुंभनिशुंभौ स्थाप्य पियत्वा महाबलौ॥ दशदोर्दंडपंचास्यत्रिनेत्रश्च जटाधरः॥ महावृषसमारूढः
स बभूव जलंधरः॥ अथ रुद्रं समायांतमालोक्य भववल्लभा॥ अन्यायांयो सखीमध्यान्तर्दर्शनपथं भवत्॥
यावद्ददर्श चार्वंगी पार्वती दनुजेश्वरः॥ तावत्स वीर्यं मुमुचुर्जडांगश्चाभवत्तदा॥ अथ ज्ञात्वा तदा गौरी दानवं भ
यविह्वला॥ जगामांतर्हिता वेगात्सा तदा मानसं सरः॥ तामदृष्ट्वा ततो दैत्यः क्षणाद्विद्युल्लतामिव॥ जवेनागात्पुन
र्युद्धं यत्र देवो वृषध्वजः॥ पार्वत्यपि ततो याद्विष्णुं संस्मार मनसा तदा॥ तावद्ददर्श तं देवं स्वोपविष्टं समीपगं॥
पार्वत्युवाच॥ ॥विष्णो जलंधरो दैत्यः कृतवान्परमद्भुतं॥ तत्किं न विदितं ते स्ति चेष्टितं तस्य दुर्मतेः॥ श्री



Indira Gandhi National
Centre for the Arts

नदा२

विष्णुरुवाच॥ तेनैव दर्शितः पंथा वयमप्यन्वियामहे॥ नान्यथास्य त्ववेद्ध्यः पातिव्रत्यात्सुरद्विषः॥ ॥श्रीनारद
उवाच॥ जगाम विष्णुरित्युक्त्वा पुनर्जालंधरं पुरं॥ अथारुद्रस्वगंधर्वस्तु गतः सागरोत्थितः॥ अंतर्द्धानगतो मा
यां दृष्ट्वा स बुबुधे ॥ ततः शिवो विस्मितमानसः पुनर्जगाम युद्धाय जालंधरं रुषा॥ स चापि दैत्यः पुनरागतं
शिवं दृष्ट्वा शिवोपरि समवाकिरद् रणे॥ ॥इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये जालंधरोपाख्याने पंचदशोऽध्यायः
श्रीनारद उवाच॥ ॥विष्णुर्जालंधरं गत्वा तद्दैत्यपुटभेदनं॥ पातिव्रत्यस्य भंगाय वृंदायाश्चाकरोन्मतिं॥ अथ वृं
दा किल सा देवी स्वप्नमध्ये ददर्श ह॥ नरं महिषखरारूढं तैलाभ्यक्तं दिगंबरं॥ कृष्णप्रसूनभूषाढ्यं क्रव्यादगण
सेवितं॥ दक्षिणाशां गतं मुंडे तमसा प्यावृतं तदा॥ स्वपुरं सागरे मग्नं सहसैवात्मना सह॥ ततः प्रबुद्धा सा बाला
तं स्वप्नं स्वविचिंत्यती॥ ददर्शोदितमादित्यं सच्छिद्रं निःप्रभं मुहुः॥ तदनिष्टमिति ज्ञात्वा रुदती भयविह्वला॥
कुत्रचिन्नालभच्छर्म्म गोपुराट्टालभूमिषु॥ ततः सखीद्वययुता नगरोद्यानमाविशत्॥ तत्रापि सा भ्रमद्बाला
नालभत्कुत्रचित्सुखं॥ वनाद्वनांतरं याता नैववेदात्मनस्तदा॥ ततः सा भ्रमती बाला ददर्शातीव भीषणौ॥ रा
क्षसौ सिंहवदनौ दृष्ट्वा नयानमासौ॥ तौ दृष्ट्वातीव विह्वला पलायनपरा तदा॥ ददर्श तापसं शांतं सशिष्यं मौन १६
मास्थितं॥ ततस्तत्कंठमासज्य निजां बाहुलतां भयात्॥ मुने मां रक्ष शरणमागतामित्यभाषत॥ मुनिस्तां
विह्वलां दृष्ट्वा राक्षसानुगतां तदा॥ हुंकारेणैव तौ घोरौ चकार विमुखौ रुषा॥ तद्धुंकारभयत्रस्तौ दृष्ट्वा तौ वि

मुखौ गतौ॥ प्रणम्य दंडवद्भूमौ वृंदा वचनमब्रवीत्॥ वृंदोवाच॥ रक्षिताहं त्वया घोराद्भयादस्मात्कृपानिधे॥ किं
चिद्विज्ञप्तुमिच्छामि कृपया तन्निशामय॥ जालंधरो हि मद्भर्त्ता रुद्रं योद्धुं गतः प्रभो॥ स तत्रास्ते कथं युद्धे तन्मे कथ
य सुव्रत॥ श्रीनारद उवाच॥ मुनिस्तद्वाक्यमाकर्ण्य कृपयोर्ध्वमवैक्षत॥ तावत्कपी समायातौ प्रणम्याग्रतः स्थि
तौ॥ ततस्तद्भ्रूलतासंज्ञानियुक्तौ गगने गतौ॥ गत्वा क्षणार्द्धादागम्य प्रणतावग्रतः स्थितौ॥ शिरः कबंधहस्तौ
च दृष्ट्वाब्धितनयस्य सा॥ पपात मूर्च्छिता भर्तृव्यसनदुःखिता॥ कमंडलूदकासिक्ता मुनिनाश्वासिता
तदा॥ स्वनर्त्तितानेसा नालं कृत्वा दीना रुरोद ह॥ वृंदोवाच॥ यः पुरा सुखसंवादैर्विनोदयसि मां प्रभो॥ स कथं
न वदस्यद्य वल्लभो मामनागसं॥ [illegible] येन देवाः सगंधर्वा निर्जिता विष्णुना सह॥ स कथं तापसेन
त्वं त्रैलोक्यविजयी हतः॥ श्रीनारद उवाच॥ इति विलप्य तदा वृंदा तं मुनिं वाक्यमब्रवीत्॥ वृंदोवाच॥ कृपानिधे मुनिश्रेष्ठ
जीवयैनं मम प्रियं॥ त्वमेवास्य पुनः शक्तो जीवनाय मतो मम॥ श्रीनारद उवाच॥ इति तद्वाक्यमाकर्ण्य प्रहसन्मुनिरब्र
वीत्॥ श्रीमुनिरुवाच॥ नायं जीवयितुं शक्यो रुद्रेण निहतो युधि॥ तथापि कृपयाविष्टस्त्वत्पतिं जीवयाम्यहं॥ श्री
नारद उवाच॥ इत्युक्त्वांतर्दधे विप्रस्तत्र सागरनंदनः॥ वृंदामालिंग्य तद्वक्त्रं चुचुंब प्रीतमानसा॥ अथ वृंदापि त
श्चिरं रेमे हर्षितमानसा॥ रेमे तद्वनमध्यस्था तद्युक्ता बहुवासरं॥ कदाचित्सुरतस्यांते दृष्ट्वा विष्णुं तमेव हि॥ नि
र्भर्त्स्य क्रोधसंयुक्ता वृंदा वचनमब्रवीत्॥ श्रीवृंदोवाच॥ धिक्तदेवं हरेः शीलं परदाराभिगामिनः॥ ज्ञातोसि

Indira Gandhi National Centre for the Arts

चं मया सम्यङ् मायाप्रच्छन्नतापसः॥ यौ त्व रामा मया दृष्टौ तौ स्वकीयौ दर्शितौ मम॥ तावेव वानरौ सोऽत्र त्वत्कांता
यौ तिवनयिष्यतः॥ त्वं चापि त्वत्पतिं दृष्ट्वा नैव नेकपि सहायवान्॥ नवस वैश्वरणा यत्र स्ते शिष्यत्वमाग
तः॥ श्रीनारद उवाच॥ इत्युक्ता सा तदा वृंदा प्रविशद्धव्यवाहनं॥ विष्णुना वार्यमाणापि तस्मिन्नासक्तचेतसा
॥ ततो हरिस्तामनुसंस्मरन्मुहुर्वृंदाचिताभस्मरजोवगुंठितः॥ तत्रैव तस्थौ सुरसिद्धसंघैः प्रबोध्यमानोपि
ययौ न शांतिं॥ ॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये जालंधरोपाख्याने षोडशोऽध्यायः॥ श्रीनारद उवा
च॥ ततो जलंधरो दृष्ट्वा रुद्रमद्भुतविक्रमं॥ चकार मायया गौरीं त्र्यंबकं मोहयन्निव॥ रथोपरि गतो बद्धां
रुदंतीं पार्वतीं शिवः॥ निशुंभशुंभदैत्यैश्च बध्यमानां ददर्श सः॥ गौरीं तथाविधां दृष्ट्वा शिवोप्युद्विग्नमान
सः॥ अवाङ्मुखस्थितस्तूष्णीं विस्मृत्य स्वपराक्रमं॥ ततो जलंधरो वेगात्त्रिभिर्विव्याध सायकैः॥ आपुं
खमग्नैस्तु रुद्रं शिरस्युरसि चोदरे॥ ततो ज्ञात्वा स तां मायां मायया तु प्रबोधितः॥ रौद्ररूपधरो जातो ज्वा
लामालातिभीषणः॥ तस्यातीव महारौद्ररूपं दृष्ट्वा महासुराः॥ नशुंभप्रमुखास्तस्यात्तुं न जिरते दिशो दश
॥ ततः शापं ददौ रुद्रस्तयोः शुंभनिशुंभयोः॥ गौरीविडंबिता यस्माद्वो यौ वध्यौ भविष्यथ॥ पुनर्जलं १२
धरो वेगाद्ववर्ष निशितैः शरैः॥ बाणांधकारसंछिन्नं यथा नव बलं महत्॥ यावद्रुद्रः प्रचिच्छेद तस्य बाणग
णं त्वरात्॥ तावत्स परिघेणाशु उग्घातवृषभं बली॥ वृषस्तेन प्रहारेण परावृत्तो रणांगणात्॥ रुद्रेणाकृ

ष्यमाणोपि न तस्थौ रणभूमिषु॥ ततः परमसंक्रुद्धो रुद्रो रौद्रवपुर्धरः॥ चक्रं सुदर्शनं वेगात्तच्चिक्षेपादित्यव
र्चसं॥ प्रहसन्नाद्रिनी वेगान्नदीसाद्यजलंधरः॥ जहार तच्छिरः कायान्महदायतलोचनं॥ रथात्कायः पपात
स्य नादयन्वसुधातलं॥ तेजश्च निर्गतं देहात्तद्रुद्रे लयमागमत्॥ वृंदा देहोद्भवं तेजस्तद्गौर्यां लयमाग
तं॥ अथ ब्रह्मादयो देवा हर्षादुत्फुल्ललोचनाः॥ प्रणम्य शिरसा रुद्रं शशंसुर्विष्णुचेष्टितं॥ देवा ऊचुः॥ महादे
व त्वया देवा रक्षिताः शत्रुजाद्भयात्॥ किंचिदन्यत्समुद्भूतं तत्र किं करवामहे॥ वृंदालावण्यसंभ्रांतो विष्णु
स्तिष्ठति मोहितः॥ ईश्वर उवाच॥ गच्छध्वं शरणं देवा विष्णोर्मोहापनुत्तये॥ शरण्यां मोहिनीं मायां सा वः का
र्यं करिष्यति॥ श्रीनारद उवाच॥ इत्युक्त्वांतर्दधे देवः सहभूतगणैस्तदा॥ देवाश्च तुष्टुवुर्मूलप्रकृतिं भक्तव
त्सलां॥ देवा ऊचुः॥ यदुद्भवाः सत्त्वरजस्तमोगुणाः सर्गस्थितिध्वंसविधानकारणाः॥ यदिच्छया विश्वमिदं भव
त्यभावे यया ति मूलप्रकृतिं नताः स्म ताम्॥ या पंचविंशातिजगत्सु संश्रिता जगत्त्यशेषं समधिष्ठिता परा॥ यद्रूपका
र्पण्यजडास्तयोपि ते देवास्तु मूलप्रकृतिं नताः स्म तां॥ यद्भक्तियुक्ताः पुरुषास्तु नित्यं दारिद्र्यमोहात्युपरा
न वादान्॥ न प्राप्नुवंत्यत्र हि भक्तवत्सलां सदैव मूलप्रकृतिं नताः स्म तां॥ श्रीनारद उवाच॥ स्तोत्रमेतत्त्रि
संध्यं यः पठेदेकाग्रमानसः॥ दारिद्र्यमोहदुःखानि न स्पृशंति कदाचन॥ इत्थं स्तुवंतस्ते देवास्तेजोमंडलमा
स्थितां॥ ददृशुर्गगने तद्वज्ज्वालाव्याप्तदिगंतरां॥ तन्मध्याद्भारतीं सर्वे शुश्रुवुः सा ह्यशरीरिणी॥ नाम्नुवाच॥
॥श्रीआद्याशक्तिरुवाच॥



Indira Gandhi National Centre for the Arts

अहमेव त्रिधा भिन्ना तिष्ठामि त्रिविधैर्गुणैः ॥ गौरी लक्ष्मी स्वरा चेति रजःसत्वतमोगुणैः ॥ तत्र गच्छत याः कार्यं वि
धास्यंत्येव वः सुराः ॥ श्रीनारद उवाच ॥ इत्येतामिति तां वाचमंतर्द्धानि भगान्महः ॥ देवानां विस्मयोत्फुल्लनेत्रा
णां वतदा नृप ॥ ततः सर्वेपि ते देवा गत्वा तद्वाक्यनोदिताः ॥ गौरीलक्ष्मीस्वरां चैव प्रणेमुर्भक्तितत्पराः ॥ तास्त
या तं सुरान्दृष्ट्वा प्रणतान्भक्तवत्सलाः ॥ बीजानि प्रददुस्तेभ्यो वाक्यानि च गदुस्तदा ॥ श्रीदेव्युवाच ॥ इमा
नि देवा बीजानि विष्णुर्यत्रावतिष्ठति ॥ निर्वपध्वं ततः कार्यं तदनो सिद्धिमेष्यति ॥ श्रीनारद उवाच ॥ ततस्ते हृष्टाः
सुरसिद्धसंघाः प्रगृह्य बीजानि विविक्षिपुस्ता ॥ वृंदावितान्यभितले स यत्र विष्णुः सदा तिष्ठति स्व सौख्यहेतोः ॥
॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादांतर्गतपृथुनारदसंवादे जलंधरोपाख्याने
सप्तदशोध्यायः ॥ श्रीनारद उवाच ॥ क्षिप्तेषु तेषु बीजेषु यावनस्पत्यस्तथाभवन् ॥ धात्री च मालती चैव तु
लसी च नृपोत्तम ॥ धात्र्युद्भवा स्मृता धात्री माभवा मालती स्मृता ॥ गौरीभवा च तुलसी तमःसत्वरजोगु
णाः ॥ स्त्रीरूपिण्या वनस्पत्या दृष्ट्वा विष्णुस्तदा नृप ॥ उत्तिष्ठत्संभ्रमाद्वृंदारूपातिशायविभ्रमात् ॥ दृष्ट्वा या
चत ते मोहात्कामासक्तेन चेतसा ॥ तं चापि तुलसी धात्र्यौ रागेणैवावलोकितुं ॥ यच्च लक्ष्म्या पुरा बीज
मीर्षया च समर्पितं ॥ तस्मात्तदुद्भवा नारी तस्मिन्नीर्ष्यायुताभवत् ॥ तस्माद्वनस्पतिस्त्वन्या कृतिनावि
गर्हिका ॥ ततः सा बर्बरी ख्याता सदापातीव गर्हिता ॥ धात्रीतुलस्यौ तद्रागात्तस्य प्रीतिप्रदे तदा ॥ त १८



ता विस्मयं तदुःखो सौ विष्णुस्ताभ्यां सदेव तु ॥ वैकुंठं गमदृष्टः सर्वदेवनमस्कृतः ॥ कार्त्तिकोद्यापने तस्मा
द्विष्णोः पूजा विधीयते ॥ तुलस्या मूलदेशे स्य प्रीतिदा सा यतः स्मृता ॥ तुलसीकाननं राजन्गृहे यस्य
स्याव तिष्ठति ॥ तद्गृहं तीर्थरूपं तु नायांति यमकिंकराः ॥ सर्वपापहरं पुण्यं कामदं तुलसीवनं ॥ रोपयं
ति नराः श्रेष्ठास्ते न पश्यंति भास्करिं ॥ दर्शनं नर्मदायास्तु गंगास्नानं तथैव च ॥ तुलसीवनसंसर्गस्त
समेतत्त्रयं स्मृतं ॥ रोपणात्पालनात्सेकाद्दर्शनात्स्पर्शनान्नृणां ॥ तुलसी दहते पापं वाङ्मनःकायसंचितं ॥
तुलसीमंजरीभिर्यः कुर्याद्धरिहरार्चनं ॥ न स गर्भगृहं याति मुक्तिभागी न संशयः ॥ पुष्कराद्यानि ती
र्थानि गंगाद्याः सरितस्तथा ॥ वासुदेवादयो देवा वसंति तुलसीदले ॥ तुलसीमंजरीयुक्तो यस्तु प्रा
५ णान्विमुंचति ॥ यमोपि नेक्षितुं शक्तो युक्तं पापशतैरपि ॥ तुलसीकाष्ठजं यस्तु चंदनं धारयेन्नरः ॥ त
द्देहं न स्पृशेत्पापं क्रियमाणमपीह यत् ॥ तुलसीविपिनच्छाया यत्र यत्र भवेन्नृप ॥ तत्र श्राद्धं प्रकर्तव्यं
पितृणां दत्तमक्षयं ॥ धात्रीच्छायासु यः कुर्यात्पिंडदानं नृपोत्तम ॥ मुक्तिं प्रयांति पितरस्तस्य ये निरय
स्थिताः ॥ मूर्ध्नि पाणौ मुखे चैव देहे च नृपसत्तम ॥ धत्ते धात्रीफलं यस्तु स विज्ञेयो हरिः स्वयं ॥ धात्रीफ
लं च तुलसीमृत्तिका द्वारकोद्भवा ॥ यस्य देहस्थिता नित्यं जीवन्मुक्तः स उच्यते ॥ धात्रीफलं तु सम्मिश्रं
विष्णोः सायुज्यमाप्नोति सत्यं सत्यं नृपोत्तम ॥ तुलसीमृत्तिकालिप्तो यस्तु प्राणान्विमुंचति ॥ ५

Indira Gandhi National Centre for the Arts

स्तुलसीपत्रसंयुतैः। जलैः स्नाति नरस्तस्य गंगास्नानफलं स्मृतं॥ देवार्चनं नरः कुर्याद्धात्रीपत्रैः फलैस्तथा
॥ सुवर्णमणिमुक्तौघैरर्चनस्याप्नुयात्फलं॥ तीर्थानि मुनयो देवा यज्ञाः सर्वेपि कार्त्तिके॥ नित्यं धात्रीस
माश्रित्य तिष्ठंत्यर्के तुलास्थिते॥ द्वादश्यां तुलसीपत्रं धात्रीपत्रं च कार्त्तिके॥ लुनाति स नरो गच्छेन्निर
यानतिगर्हितान्॥ धात्रीछायां समाश्रित्य कार्त्तिकेन्नं तु न क्रियः। अन्नसंसर्गजं पापमावर्षं नश्य
त्यति॥ धात्रीमूले च यो विष्णुं कार्त्तिके पूजयेन्नरः॥ विष्णुक्षेत्रेषु सर्वेषु पूजितस्तेन सर्वदा॥ धात्रीतुलस्या
र्माहात्म्यमपि देव स्वलु मुखः। न समर्थो भवेद्वक्तुं यथा देवस्य शार्ङ्गिणः॥ श्रीनारद उवाच॥ धात्रीतुलस्युद् स्य ६
वकारणं च शृणोति यः श्रावयते च वा कथा॥ विधूतपाप्मा सह पूर्वजैस्स स्वर्गं व्रजत्यग्र्यविमानसंस्थः॥
॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादांतर्गत पृथुनारदसंवादे तुलसीधा
त्र्युत्पत्तिर्महिमा कथनं नाम षोडशोध्यायः॥ श्रीपृथुरुवाच॥ सतिहासमिमं ब्रह्मन्माहात्म्यं कथि
तं त्वया॥ आश्चर्यकरं समस्तं तुलस्यास्त्वद्भुतं महत्॥ यद्वृत्तं व्रतिनः पुंसां फलं महदुदाहृतं॥ त १८
स्य नर्क्षहिमा माहात्म्यं केन चीर्णमिदं कथ॥ श्रीनारद उवाच॥ आसीत्सह्याद्रिविषये करवीरपुरे पुरा
॥ ब्राह्मणो धर्मवित्कश्चिद्धर्मदत्तेति विश्रुतः॥ विष्णुव्रतकरः शश्वद्विष्णुपूजारतः सदा॥ द्वादशाक्षर

विद्यायां च पतिष्ठोतिथिप्रियः॥ कदाचित्कार्त्तिके मासि हरिजागरणाय सः॥ रात्र्यां तुर्यांशशेषायां ज
गाम हरिमंदिरं॥ हरिपूजोपकरणान्यगृह्य व्रजता तदा॥ तेन दृष्टा समायाता राक्षसी भीमनिस्वना॥ वक्र
दंष्ट्रा ललज्जिह्वा निमग्ना रक्तलोचना॥ दिगंबरा शुष्कमांसा लंबोष्ठा घर्घरस्वना॥ तां दृष्ट्वा भयवित्रस्तः के
पिताचयवस्तदा॥ पूजोपकरणैर्गात्रे तयो त्रिः स्वाहन द्रुयात्॥ संस्मृत्य च हरेर्नाम तुलसीयुक्तवारिणा
॥ सो हनत्तां ततस्तस्याः सर्वमगात्क्षयं॥ अथ संस्मृत्य सा पूर्वजन्मकर्मविपाकजं॥ स्वां दशामब्रवीच्
द्विप्रं दंडवत्प्रणम्य सा॥ कलहोवाच॥ पूर्वकर्मविपाकेन दशामेतां गतास्म्यहं॥ तत्कथं तु पुनर्विप्र याया
म्यहं गतिमुत्तमां॥ श्रीनारद उवाच॥ तां दृष्ट्वा प्रणतामग्रे वदमानां स्वकर्म तत्॥ अतीव विस्मितो विप्रस्तदा
वचनमब्रवीत्॥ श्रीधर्मदत्त उवाच॥ केन कर्मविपाकेन त्वं दशामीदृशीं गता॥ कुतस्त्वं का च किंशीला तत्स
र्वं कथयस्व मे॥ कलहोवाच॥ सौराष्ट्रनगरे ब्रह्मन्भिक्षुर्नामाभवद्द्विजः॥ तस्याहं गृहिणी पूर्वं कलहा
ख्यातिनिष्ठुरा॥ न कदाचिन्मया भर्तुर्वचसापि शुभं कृतं॥ नार्पितं तस्य मिष्टान्नं भर्तुर्वचनभंगया॥ कलह
प्रियया नित्यं तस्योद्विग्नमना यदा॥ परिणेतुं तदान्यां स मतिं चक्रे पतिर्मम॥ ततो गरं समादाय प्राणास्त्यक्ता
मया द्विज॥ अथ बद्ध्वा च मां नीता मारयन्तो यमानुगाः॥ यमश्च मां तदा दृष्ट्वा चित्रगुप्तमपृच्छत॥ यम उवाच॥
अनया किं कृतं कर्म चित्रगुप्त विलोकय॥ प्राप्नोत्येषा यतः कर्मफलं शुभमथाशुभं॥ कलहोवाच॥ चित्र
गुप्तस्ततो वाक्यं तर्ज्जयन्मामुवाच ह॥ चित्रगुप्त उवाच॥ अनया तु शुभं कर्म कृतं किंचिन्न विद्यते॥ भुंक्तान्न

Indira Gandhi National Centre for the Arts

यातु मिष्टान्नं न तन्नारिति दर्पिता ॥ अतश्च वल्गुली योन्यां स्वविष्ठादा वतिष्ठतु ॥ तन्नु रुक्ष्णा सदाप्येषा नित्यं क-
लहकारिणी ॥ विष्ठादा शूकरी योन्यां नित्यं तिष्ठत्वियं हरे ॥ पाककाले सदा नु क्तेतु भांडे चैषा यतः स्थिता ॥ तस्मा-
द्माविडालस्य स्वजातापत्य भक्षिणी ॥ तन्नीरमपि वादि त्रय आत्मघातं कृतीयया ॥ तस्मान्नतराधीरपिति-
ष्ठत्वेषाति निंदिता ॥ अतश्चैषाम रुद्देशे प्रापितव्या जनैर्हरे ॥ तत्र प्रेतशरीरस्था चिरं तिष्ठत्वियं ततः ॥ ऊर्द्ध्व-
योनित्रयं वैषा तुन कर्मसु कारिणी ॥ कलहोवाच ॥ साहं पंचशतान्यानि प्रेतदेहस्थिता किल ॥ क्षुत्तृड्-
पीडिता नित्यं दुःखिता स्वेन कर्मणा ॥ ततः क्षुत्पीडिता विश्य नारीं वणिज स्सह ॥ आयाता दक्षिणदेशं कृष्ण-
वेण्याः स्व संगमे ॥ तत्तीरसंस्थिता यावत्तावत्तस्य शरीरतः ॥ शिवविष्णुगणैर् अपाकृष्टा पीडिता ह ॥ ततः
तृतः क्षुन्नामयादृष्टा त्वमत्याच मया द्विज ॥ त्वद्धस्ततुलसीवारि संसर्गगतया मया ॥ ततः कृपां कुरु विप्र
त्वं कथं मुक्तिमियामहे ॥ योनित्रयाद्यस्मात्तावाद स्माच्च प्रेतदेहतः ॥ श्रीनारद उवाच ॥ इत्येवं निशम्य कलहा-
ववनं द्विजः ॥ स्तत्कर्मपाकनयविस्मयदुःखयुक्तः ॥ तद्ग्लानिदर्शनकृपाचलचित्तवृत्तिर्ध्यात्वा चिरं स-
ववनं निजगाद दुःखात् ॥ इति श्रीपद्मपुराणे कार्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादे तदंतर्गत पृथुना-
रदसंवादे कलहोपाख्याने ऊनविंशोध्यायः ॥ श्रीधर्मदत्त उवाच ॥ विलयं यांति पापानि तीर्थदानव्र- २०
तादिभिः ॥ प्रेतदेहस्थिता यास्मि तेनु नैवाधिकारिता ॥ तद्ग्लानिदर्शनादस्मात्खिन्नं च मम मानसं ॥ नैव
निर्वृतिमायाति त्वा मनुद्धृत्य दुःखितां ॥ पातकं च तवात्युग्रं योनित्रयविपाकदं ॥ नैवान्यैः क्षीयते पुण्यैः

प्रेतत्वं वातिगर्हितं ॥ तस्मादाजन्मजनितं यन्मया कार्तिकव्रतं ॥ तत्पुण्यस्यार्द्धभागेन सद्गतिं समवाप्नुहि ॥
कार्तिकव्रतपुण्येन साम्यं यांति सर्वथा ॥ यज्ञदानानि तीर्थानि व्रतान्यपि यतो ध्रुवं ॥ श्रीनारद उवाच ॥ इत्यु-
क्त्वा धर्मदत्तः सो यावत्तामभ्यषेचयत् ॥ तुलसीमिश्रतोयेन श्रावयन्द्वादशाक्षरीं ॥ तावत्सा तत्र निर्मुक्ता
ज्वलदग्निशिखोपमा ॥ दिव्यरूपधरा कांता लावण्येन यथेंदिरा ॥ ततः सा दंडवद्भूमौ प्रणनामाथ तं द्विजं ॥ उवा-
च तदा वाक्यं हर्षगद्गदभाषिणी ॥ कलहोवाच ॥ त्वत्प्रसादाद्द्विजश्रेष्ठ विमुक्ता नरकादहं ॥ पापाब्धौ मज्जमा-
नायास्त्वं नौरूपोसि मे ध्रुवं ॥ श्रीनारद उवाच ॥ इत्थं सा वदती विप्रं ददर्शायांतमंबरात् ॥ विमानं तास्करैर्युक्तं
विष्णुरूपधरैर्गणैः ॥ अथ सा तद्विमानाग्रं स्थात्वामधिरोपिता ॥ पुण्यशीलसुशीलाभ्यामप्सरोगणसंविते
तद्विमानं तदापश्यद्धर्मदत्तः सविस्मयः ॥ पपात दंडवद्भूमौ दृष्ट्वा तौ पुण्यरूपिणौ ॥ पुण्यशीलसुशीलौ तौ वन-
मुत्थाप्यानतं द्विजं ॥ समभ्यनंदतां वाक्यं चतुर्धर्मसंहितं ॥ श्रीगणावूचतुः ॥ साधु साधु द्विजश्रेष्ठ यस्त्वं विष्णु-
तः सदा ॥ दीनानुकंपी धर्मज्ञो विष्णुव्रतरतः सदा ॥ आबाल्यात्कृतं चैतद्यत्त्वया कार्तिकव्रतं ॥ तस्यार्द्धदा-
नेन पुण्यं द्विगुणमागतं ॥ जन्मांतरशतोद्भूतं पापं तद्विलयं गतं ॥ स्नानेनैव गतं पापं यदस्याः सर्वकर्मजं ॥
हरिजागरणाद्यैश्च विमानमिदमास्थिता ॥ तुलसीपूजनाद्यैश्च विमानमिदमास्थिता ॥ कार्तिकव्रतकैः
सुतैः ॥ विष्णुसान्निध्यमाजाता त्वया दत्तैः कृपालुना ॥ त्वमप्यस्यानवस्यांते भार्याभ्यां सह यास्यसि ॥
वैकुंठभवनं विष्णोः सान्निध्यं च सरूपतां ॥ ते धन्याः कृतकृत्यास्ते तेषां च सफलो भवः ॥ यैर्भक्त्याराधिता वि-
नो

Indira Gandhi National
Centre for the Arts

ष्टुर्धर्मदत्तलयायथा॥ समुपागताधिनो विष्णुः किं न यच्छति देहिनां॥ अत्रान्तरे तिर्यगन्धकवले स्थापितः पुरा
यान्नामस्मरणाद्देवदेहिनो यांति सद्गतिं॥ ग्राहग्रहीतो नागेंद्रो यन्नामस्मरणात्पुरा॥ विमुक्तः सन्निधिं प्रा
प्तो जातोयं जयसंज्ञकः॥ अतस्त्वयार्चितो विष्णुः स्वसान्निध्यं प्रदास्यति॥ बहून्यब्दसहस्राणि तासां त्वार्थी दय
पुत्रस्य ते॥ ततः पुण्यक्षये जाते यदा यास्यति भूतले॥ सूर्यवंशोद्भवो राजा विख्यातस्त्वं भविष्यसि॥ ना
म्नाद्वारस्थस्तत्र नायामि द्वयमतः पुनः॥ तृतीयया नयाचापि यातेपुण्यो इन्दुनागिनी॥ तत्रापि तव सान्नि
ध्यं विष्णुर्दास्यति भूतले॥ आत्मानं तव पुत्रत्वे प्रकल्प्यामरकार्यकृत्॥ तदा जन्मत्रतादस्माद्विष्णुसंतुष्टि
कारकान्॥ नयस्तानवदाना नि नित्यतीर्थान्यधिकानि वै॥ धन्योसि कृतकृत्योसि विप्राग्र्य यतस्त्वयेतद्व्रत
कृतं तु ह्यैकं गजगद्गुरोः॥ यद्दानादानफलं सुरासुरैः प्रणीयते स्मानिरियं सलोकता॥ इति श्रीपद्मपुराणे
पातालखंडे कार्त्तिकमाहात्म्ये श्रीकृष्णसत्यभामासंवादांतर्गत पृथुनारदसंवादे कलहोपाख्याने धर्म
दत्तविष्णुगणसंवादे द्विशतितमोध्यायः॥ श्रीनारद उवाच॥ इत्येतद्वचनं श्रुत्वा धर्मदत्तः सविस्मयः॥ प्रण
म्य दंडवद्भूमौ वाक्यमेतदुवाच ह॥ श्रीधर्मदत्त उवाच॥ आराधयंति सर्वेपि विष्णुं तद्भक्तिनाशनाः यथोदि
तैर्व्रतैस्तीर्थैस्तपोभिश्च यथाविधिः॥ विष्णुप्रीतिकरं तेषां किं विसान्निध्यकारकं॥ यत्कृत्वा तानि चान्यानि
लि सर्वाण्यपि भवंति हि॥ श्रीगणाऊचतुः॥ साधु पृष्टं त्वया विप्र शृणुष्वैकाग्रमानसः॥ इतिहासं कथाम
त्र कथ्यमानां पुरातनां॥ कांतिपुर्यां पुरा चोलश्चक्रवर्ती नृपोभवत्॥ यस्याह्वयेव तन्नाम्ना देशोस्ति प्र

ग्या

थांगतां॥ यस्मिन्राज्ञा सति स्वचक्रं दरिद्रो वापि दुःखितः॥ पापबुद्धिः सरुग्वापि नैव कश्चिदभून्नरः॥ यस्यापि
नं तयज्ञस्य ताम्रपर्णीतटे शुभे॥ सुवर्णयूपैः शोभाढ्या शोभावास्ते चैत्ररथोपमा॥ सकदाचिद्गतो राजा सन
ताख्यायनं द्विज॥ यत्रास्ते जगतां नाथो योगनिद्रामुपासते॥ तत्र श्रीरमणं देवं संपूज्य विधिवन्नृपः॥ मणि
मुक्ताफलैर्दिव्यैः स्वर्णपुष्पैश्च नैकशः॥ प्रणम्य दंडवद्भूमावुपविष्टः स तत्र वै॥ तावद्ब्राह्मणमायांतम
पश्यद्देवसन्निधौ॥ देवार्चनार्थमायांतं तुलस्युदकपाणिनं॥ स्वपुरावासिनं तत्र विष्णुदासाह्वयं द्विजं॥
तत्रागत्य स विप्रर्षिर्देवदेवमपूजयत्॥ विष्णुसूक्तेन संस्नाप्य तुलसीमंजरीदलैः॥ तुलसीपूजया तत्र
तां स्य रत्नपूजा पुराकृता॥ आच्छादिता समालोक्य राजा क्रुद्धो ब्रवीद्द्विजं॥ चोलचक्रवर्त्युवाच॥ माणिक्यस्वर्णपूजात्रशो
भाढ्या या मयाकृता॥ विष्णुदास कथं सा यमाच्छिन्ना तुलसीदलैः॥ विष्णुभक्तिं न जानासि वराकोसि मतो
मम॥ यस्त्विमामपि शोभाढ्यां पूजामाच्छादयस्यहो॥ गणावूचतुः॥ इति तद्वचनं श्रुत्वा स क्रोधः स द्विजोत्त
मः॥ राज्ञो गौरवमुल्लंघ्य जगाद वचनं तदा॥ श्रीविष्णुदास उवाच॥ राजन्न किं न जानासि गर्वितोसि नृपश्रि
या॥ कियद्विष्णुव्रतं सर्वं त्वया वीर्यविदस्य न त॥ श्रीगणावूचतुः॥ तद्वाक्यं तव च श्रुत्वा प्रहस्य स नृपोत्तमः॥ वि
ष्णुदासं तदा गर्वादुवाच वचनं द्विजं॥ चोलचक्रवर्त्युवाच॥ इत्युक्ते हृदसे विप्र विष्णुभक्त्याति गर्वितः॥ भक्तिस्ते कि
यती विष्णौ दरिद्रस्याधनस्य च॥ यज्ञदानादिकं नैव विष्णोः स्फुटितः कृतं॥ नापि देवालयं सर्वं कृतं विप्र त्वया

Indira Gandhi National
Centre for the Arts

कवितः॥ इंद्रियाण्यर्पिते गर्वएषतिष्ठतिसत्क्रियः॥ तत्कृएवं तु वचो मह्यं सर्वेप्येते द्विजा मयः। साक्षात्कारमहं विष्णो
रेषवादेनाभिप्स्यति॥ परं यत्तु सर्वं पितनीरत्क्रिं राख्यं तिचावयोः॥ श्रीगणा ऊचतुः। इत्युक्त्वा सत्पोगच्छन्निर्
गत्य गृहं द्विजाः। आरब्धं तु स्वं सत्रं कृत्वा चार्यत्तुमुद्गलः। ऋषिसंघसमाजुष्टं बहुन्नं बहुदक्षिणं॥ यद्दृष्ट्वा सकृत्त
पूर्वगयास्थिते समं द्विनत॥ विष्णुदासोपि तत्रैव तस्थौ देवालये व्रती। पंचैतानियमान्कुर्वन्विष्णुतुष्टिका
रान्सदा॥ माघोर्जयोर्व्रतं सम्यक् तुलसीवनपालनं॥ एकादश्याव्रतं ज्ञापोद्वादशाक्षरविद्यया॥ उपचारैः षो
न७ डशाभिन्नृत्यगीतादिमंगलैः॥ नित्यं विष्णोस्तथा पूजा व्रतान्येतानि सोकरोत्॥ नित्यं स संस्मरन्विष्णुं गच्छन्
भुंजन्स्वपन्नपि॥ सर्वत्र तस्थितं विष्णुममन्समदर्शनं॥ माघकार्तिकयोर्नित्यं विशेषनियमानपि॥ अ
करोद्विष्णुतुष्ट्यर्थं सोद्यापनविधिः सदा॥ श्रीनारदउवा एवं समाराधयतोः श्रियःपतिं तयोश्च बालेश्वर
विष्णुदासयोः॥ अगाद्वनेहा बहुतद्धृतस्य यो स्वानिःसर्वेंद्रियकर्मणा सदा॥ इतिश्रीपद्मपुराणे क्ष्मेण्वि
उपांचवं चाधान्ना ■ दस्र्यां संहितायांश्रीकार्तिकमाहात्म्येपृथुनारदसंवादांतर्गत ■ धर्मदत्तविष्णुगण
संवादेचोलोपाख्यानेएकविंशतितमोध्यायः॥ श्रीनारद उवाच॥ कदाचिद्विष्णुदासोथ कृत्वा नित्यविधिं द्वि २२
जः॥ पाककर्म करोत्तावदहरत्कोप्यलक्षितः॥ तमदृष्ट्वाप्यसोपाकं पुनर्नैवाकरोत्तदा॥ सायंकालार्चनस्या
सीव्रतभंगभयाद्विजः। द्वितीयेह्नि ततःपाकं कृत्वा यावत्स विष्णवे॥ उपहारार्पणं कर्तुं तावत्कोप्यहरत्पुनः॥

एवं सप्त दिनं तस्य पाकं कोप्यहरद्विज॥ ततः स विस्मयः सोथ मनस्येवविचारयत्॥ अहो नित्यं सप्तस्थे
त्यकः पाकहरते मम॥ क्षेत्रसंन्यासिनस्थानमत्याज्यंमम सर्वथा॥ पुनः पाकं विधायात्र भुंज्यं तथ दि
चेन्मया। सायंकालार्चनंवेव परित्याज्यं कथंनु तत्॥ यदि पाकं विधायेव तन्नोक्षयं तु मया न तत्॥
अनिवेद्यहरोसर्ववैष्णवेत्वविभुज्यताउपोषितो दंसप्तमाहं तिष्ठाम्येतद्व्रतस्थितः॥ अद्य संरक्षणं सम्य
क्पाकस्यात्र करोम्यहं॥ इति पाकं विधायासौ तत्रैवालक्षितः स्थितः। तावद्ददर्श चांडालं पाकान्नहरणे स्थितं
।क्षुत्क्षामं दीनवदनमस्थिचर्मावशेषितं। तमालोक्याद्विजाग्र्यो स कृपया खिन्नमानसः। विलोक्यान्नहरं
विप्रस्तिष्ठतिष्ठेत्यधावत॥ कथमश्नासि विरूक्षं घृतमेतद्गृहाण भोः। इत्थं ब्रुवंतं विप्राग्र्यमायांतं स विलो
क्य चावेगाद्धावन्भीत्या मूर्छितश्चपपात सः॥ भीतं समूर्छितं दृष्ट्वा चांडालं स द्विजाग्रणी। वेगादभ्येत्य कृ
पया स्ववस्त्रेणैरवीजयत्॥ अथोत्थितं तमेवासौ विष्णुदासोथ लोकयन्। साक्षान्नारायणं देवं शंखचक्र
गदाधरं॥ पीतांबरं चतुर्बाहुं श्रीवत्सांककिरीटिनं॥ अतसीपुष्पसंकाशं कौस्तुभोरस्थलं विभुं। तं दृष्ट्वा सात्त्वि
कैर्भावैरावृतो द्विजसत्तमः॥ स्तोतुं चापि नमस्कर्तुं तदा नालंबत्त्वसः॥ अथ शक्रादयो देवास्तत्रैवाजि
ययुस्तदा॥ गंधर्वाप्सरसश्चापि जगुश्च ननृतुस्तदा॥ विमानशतसंकीर्णं दिवर्षिगणसेवितं गीतवादित्रनि
र्घोषं स्याभंतमस्नवततदा॥ ततो विष्णुः समालिंग्य स्वभक्तं सात्विकाव्रतं॥ सारूप्यमात्मनो दत्वानयद्वैकुंठमंदि

Indira Gandhi National
Centre for the Arts

विमानवरसंस्थं तं गच्छंतं विष्णुसंनिधिं। दृष्ट्वा तत्रालयं तत्र विष्णुदासं ददर्श सः॥ वैकुंठभुवने यांतं विष्णुदासं
विलोक्य सः। स्वयज्ञसमुद्गलं वेदाहूय तं वचोऽब्रवीत्॥ श्रीचोलचक्रवर्त्तिरुवाच॥ यस्पर्द्धया मया चैतद्यज्ञदानादि
कं कृतं। स विष्णुरूपधृग्विप्रो याति वैकुंठमंदिरं। दीक्षितेन मया सम्यक्सत्रेऽस्मिन्वैष्णवे कृते। हुतमग्नौ कृतं विप्र
दानाद्यैः पूर्णमानसाः॥ न ह्यद्यापि समे देवः प्रसन्नो जायते ध्रुवं॥ भक्त्यैव तस्य विप्रस्य साक्षात्कारं ददौ हरिः
तस्माद्दानैश्च यज्ञैश्च नैव विष्णुः प्रसीदति॥ भक्तिरेव परं तस्य निदानं दर्शने विभोः॥ श्रीनारद उवाच॥ इत्युक्त्वा जा
गिनेयं स्वमभ्यषिंचन्नृपासने॥ आबाल्याद्दीक्षितो यज्ञे यज्ञसत्रेष्वभगायत। तस्मादद्यापि तद्देशे सदा राज्यं
भागिनः॥ स्वस्रीया एव जायंते तत्र भूपावधिवर्त्तिनः। यज्ञवाटं ततो गत्वा वह्निकुंडाग्रतः स्थितः॥ त्रिरुच्चैः
उदाहरत्सो विष्णुं संबोधयंस्तदा। विष्णुभक्तिं स्थिरां देहि मनोवाक्कायकर्मणा॥ इत्युक्त्वा सोऽपतद्वह्नौ सर्वेषां
वपश्यतां मुद्गलस्ततः क्रोधात्शिखामुत्पाटयत्स्वकां। ततस्तद्यापि तद्गोत्रे मुद्गलो विशिखा बभुः। तावदा
विर्नवद्विष्णुः कुंडाग्नौ भक्तवत्सलः। नमः लिंग्य विमानाग्रं समारोहयद्युतं तमालिंग्यात्मसारूप्यदत्त्वा
वैकुंठमंदिरं तेनैव सह देवो जगाम त्रिदशैर्वृतः॥ श्रीनारद उवाच॥ यो विष्णुदासः स तु पुण्यशीलो यश्च २३
चोलनृपः स सुशीलनामा। आवाप्नोति समरूपता तौ हास्यो कृतौ तेन रमापतिर्येण॥ इति श्रीपद्मपुराणे का
र्त्तिकमाहात्म्ये पृथुनारदसंवादांतर्गत धर्मदत्तविष्णुगणसंवादे पुण्यशीलसुशीलोपाख्याने द्वाविंशतितमो
ध्यायः

श्रीधर्मदत्त उवाच॥ ॥जयश्च विजयश्चैव विष्णोर्द्वास्थौ पुरा श्रुतौ॥ किं तु ताभ्यां पुरा चीर्णं यस्मात्तद्रूपधारिणौ॥ ॥गणावूचतुः॥
तृणबिंदोः सुकन्यायां देवहूत्यां पुरा द्विज॥ कर्दमस्य तु द्वौ च पुत्रौ द्वे संबभूवतुः। नित्यमष्टाक्षरीजापौ विष्णुव्रतकरावुभौ
॥साक्षात्कारं ददौ विष्णुस्तयोर्नित्यार्चने सदा॥ मरुत्तेन कदाचित्ताचाहूतौ यज्ञकर्मणि॥ क्रमेण तथैव कुशलौ देवर्षि
गणपूजितौ॥ जयस्तत्राभवद्ब्रह्मा विजयो याजकोऽभवत्। ततो यज्ञविधिं कृत्स्नां परिपूर्णं च चक्रतुः॥ मरुत्तो वच्छ[illegible]स्ना
तो धनं ताभ्यां ददौ बहुः। तद्धनमादाय तौ विप्रौ जग्मतुः स्वाश्रमं प्रति॥ यजनार्थं [illegible] विभक्तौ [illegible] तौ तदा मुनी॥ तद्धनं वि
२८ भक्तुं तु पस्पर्द्धाते परस्परं॥ जयोऽब्रवीत्समो भागः क्रियतामिति तत्र सः॥ विजयश्चाब्रवीत्तत्र यल्लब्धं तस्य तद्भवेत्॥ ततो
प्यजयस्तं क्रोधाद्विजयं तु बभाष सः। गृहीत्वा न ददासि यत् तस्माद्ग्राहो भविष्यसि। विजयस्तस्य तं शापं श्रुत्वा सोऽप्य
शापयत्। मदभ्रांतो यतः शपसि तस्मान्मातंगतां व्रज॥ ततस्तदा च तौ तु विष्णोर्दृष्टा नित्यार्चने विभुं॥ शापयोश्च
निवृत्तिं तौ यथाचां ते रमापतिं॥ श्रीजयविजयावूचतुः॥ भक्त्यावावां कथं देव ग्राहमातंगयोनिभौ॥ भविष्यावः
कृपासिंधो तच्छापो विनिवर्त्यतां॥ श्रीभगवानुवाच॥ मद्भक्त्यो वचो सत्यं न कदाचिद्भविष्यति मयापि नान्यथा
कर्तुं शक्यं तत्तत्कदाचन॥ प्रह्लादश्च सा सत्ते प्यार्विद्ध[illegible] हा हय हपुरा॥ तथा बरीषवाक्येन जातो गर्भेष्वहं किं [illegible] त
स्माद्युवामिमौ शापावनुभूय स्वयंकृतौ॥ लप्स्यतां मत्पदं नित्यमित्युक्त्वांतर्दधे हरिः॥ श्रीगणावूचतुः॥ ततस्तौ ग्राह
मातंगौ वसंतौ गंडकीतटे॥ जातिस्मरौ तु तद्योन्यामपि विष्णुव्रते स्थितौ॥ कदाचित्स गजः स्नातुं कार्तिके गंडकी

Indira Gandhi National Centre for the Arts

गतः॥ तावज्जलाहारं तं ग्राहः संस्मरं शापकारणं॥ आदष्टदेतो नागो सोऽस्मरच्छ्रीपतिं तदा॥ तावदाविर्ब्बभूव द्विष्णुस्तं स्वच
क्रगदाधरः॥ ततस्तौ ग्राहमातंगौ चक्रं छिन्ना समुद्धृतौ॥ दत्वा च निजसारूप्यं वैकुंठमनयद्द्विजः॥ तदाप्रभृति तत्स्थानं
हरिक्षेत्रमिति स्मृतं॥ चक्रसंघर्षणाद्यस्मिन् ग्रावाणोपि हि लांछिताः॥ ताविमौ विश्रुतौ लोके जयश्च विजयश्च
ह॥ नित्यं विष्णुप्रियौ द्वास्थौ पृष्टौ यो हि त्वया द्विज॥ अतस्त्वमपि धर्मज्ञ नित्यं विष्णुव्रते स्थितः त्यक्त्वा मात्सर्यदं
भोपि त्वं भव समदर्शनिः॥ तुलामकरमेषेषु प्रातः स्नायी सदा भव॥ एकादशीव्रते निष्ठ तुलसीवनपालकः॥ ब्राह्मणा
नाश्व गाश्चापि वैष्णवांश्च सदा भज॥ मसूरिकामासनालंबु ताकानपि वै त्यज॥ एवमेव पि देहांते तेन विष्णोः परमं पदं॥
प्राप्स्यसे धर्मदत्त त्वं तद्भक्तो वयथा वयं॥ तव जन्म व्रतादस्मादिह संतुष्टिकारकात्॥ न यज्ञैर्न च दानैर्न तीर्थान्यधि
धिकानि वै॥ श्रीनारदउवाच॥ इत्युक्तो धर्मदत्तं तमुपविश्य विमानगौ॥ धर्मदत्तोऽपि सोऽज्ञातः प्रत्ययस्तद्गते स्थितः॥ नृयाकम... दयासा ईवैकुंठवनगतो ६
देहांते तद्विलोस्थानं भार्याभ्यामन्वितोऽन्यगात्॥ इति हासमिमं पुराते वं शृणुते श्रावयते च यः पुमान्॥ हरिसंनि
धिकारिणी मतिर्ल्लभते सोऽकृपया जगद्गुरोः॥ इति श्रीपद्मपुराणे कार्त्तिकमाहात्म्ये पृथुनारदसंवादे तृतीय
धर्मदत्तकलहोपाख्याने त्रयोविंशतितमोऽध्यायः॥ श्रीपृथुरुवाच॥ कृष्णवेण्या तयाद्य ... स्मात्छि व विष्णुगणैः पु २४
रा॥ ताति कृपारेः फलकलहा निरस्ता कथिता त्वया॥ प्रभावो यं तयोर्न...ः विवादकृत्र स्यतस्य वा॥ तन्मे कथय धर्म
मर्द्धि विस्मयोऽत्र महान्मम॥ श्रीनारद उवाच॥ कृष्णा कृष्णतनुः साक्षाद्वेणी यादवो महेश्वरः॥ तत्संगमप्रभावं तु नालं वक्तु
× धन्योसि हि प्रायत स्वयेतद्भूतं कृतं तुष्टिकरं जगद्गुरोः॥ यद्द्रजागापलं पुरारेः प्रणीयते स्मा ति रियं सलोकताम्॥ ५२ वक्तुमेव

तथापि तत्समुत्पत्तिं कीर्त्तयिष्यामि तां शृणु॥ चाक्षुषस्यांतरे पूर्वं मनोर्देवः पितामहः॥ सह्याद्रिशिखरे रम्ये यजमानो ह्युतोऽभ
वत्॥ स ऋत्विग्भिः समायातः सर्वदेवगणैर्वृतः॥ युक्तो हरिहराभ्यां हि तं ... शिखरं ययौ॥ भृग्वादयो मुनिगणा मुहूर्त्ते ब्र
ह्मदेवतो॥ तस्य दीक्षाविधानाय समाजं चक्रुराहृताः॥ अथ ... ख्यरां पत्नीं विष्णुराव्हायत्तदा॥ सा शनैरायमौ त
वद्भृगुर्विष्णुमुवाच ह॥ श्रीभृगुरुवाच॥ विष्णो स्वरा त्वरा हूतापि ... ति न हि सत्वरं॥ मुहूर्त्तातिक्रमश्चैव कार्या दी
क्षाविधिः कथं॥ श्रीविष्णुरुवाच॥ नायाति चेत्स्वरा शीघ्रं गायत्र्यत्र विधीयतां॥ एषापि तत्र वेदस्य पत्न्यौ किं पुण्य
कर्मणि॥ श्रीनारदउवाच॥ एवमेव हि रुद्रोपि विष्णोर्वाक्यममन्यत॥ तद्वाक्याच्च भृगुर्वव्रे गायत्रीं ब्रह्मणस्तदा॥ नि
वेश्य दक्षिणे तां गौ दीक्षाविधिमथाकरोत्॥ यावद्दीक्षाविधिं तस्य विधिं चक्रुर्मुनीश्वराः॥ तावदभ्याययौ तत्र स्वरा
यज्ञस्थलं नृप॥ ततः सा दीक्षितां दृष्ट्वा गायत्रीं ब्रह्मणा सह॥ सपत्न्येर्ष्यापि संक्रोधा स्वरा वचनमब्रवीत्॥ स्वरा उवाच॥
अपूज्या यत्र पूज्यन्ते पूज्यानां च व्यतिक्रमः॥ त्रीणि तत्र न विष्यंति दुर्भिक्षं मरणं भयं॥ मदासने कनिष्ठेयं न वद्धि सन्निवे
शिता॥ तस्मात्सर्वे जडीभूता नदीरूपा भविष्यथ॥ इयं च दक्षिणे नागे ह्युपविष्टा यदासने। तस्माल्लोके सदा हव्या स्त
नुरूपास्तु निम्नगा॥ श्रीनारदउवाच॥ ततस्तच्छापमाकर्ण्य गायत्री कुपिता धरा॥ समुच्छाय च्चापदं वैर्वीर्यमाणापि
तां स्वरा॥ श्रीगायत्र्युवाच॥ तव ... यथा ब्रह्मा ममापि च तथा खलु॥ वृथा शापस्त्वया स्मात्त्वं च त्वमपि निम्नगा॥
श्रीनारदउवाच॥ ततो हाहाकृताः सर्वे शिव विष्णुमुखाः सुराः॥ प्रणम्य दंडवद्भूमौ स्वरां तत्र व्यजिज्ञपुः॥ देवा ऊचुः॥ देवि

Indira Gandhi National
Centre for the Arts

सर्वे वयं च शापात्वत्प्रसादाद्यायथा धुना॥ यदि सर्वे जडीभूता न विष्यामोत्र निम्नगाः॥ तदा लोकत्रयं ह्येतद्विनाशिष्यति निश्चितं
अविवेकः कृतस्तस्माच्छापोयं विनिवर्त्यतां॥ श्रीस्वरउवाच॥ नार्चितो हि गणाध्यक्षो यष्टे दोयस्तु रोत्तमा॥ तस्माद्विघ्नस
मुत्पन्नमस्मो धृतमिदं खलु॥ नापि तद्वचनं ह्येतदसत्यं खलु जायते॥ तस्मात्स्वांशेन जडीभूता यूयं भवत निम्नगाः॥ आ
वामपि सपत्न्यो च स्वांशेनास्याम पि निम्नगे॥ भविष्याम तत्तो देवाः पश्चिमाभिमुखावहे॥ श्रीनारद उवाच॥ इति तद्व
चनं श्रुत्वा ब्रह्मविष्णुमहेश्वराः॥ जडीभूता भवन्नघः स्वांशेनैव तदा नृप॥ तत्र विष्णुरभूत्कृष्णा वेण्या देवो महेश्वरः॥
ब्रह्मा ककुद्मिनी चापि पृथगेव बभूवतुः॥ देवाः स्वानपि तान् शापान् जडीकृत्वा विविशुः पृथुः॥ सह्याद्रिशिखरे त्वस्ताः पृ
थगास्तस्तु निम्नगाः॥ देवांशेः पूर्ववाहिन्यो बभूवुः पश्चिमावहाः॥ तत्पत्न्यंशेः पृथक् तत्र चातशाथ सहस्रशः॥ गायत्री च
स्वरा चैव पश्चिमाभिमुखे तदा॥ योगेना नवतालघो सावित्री तिपृथ्वी गते॥ ब्रह्मणा स्थापितो तत्र यज्ञेद्विरहागु
णे॥ महाबलो तिबलिनो नाम्नावेतो बभूवतुः॥ तयोर्नद्यो स्कमादा त्यनाहं वन्कुर्हमोनृप॥ ययुर्ब्रह्मादयो देवाः स्व
चौस्त्रिष्ठति चापगाः॥ कृष्णोद्भवं पापहरं परं यः शृणोति यः श्रावयते च नः॥ स्यात्तस्य पुंसः सकलं फलं यत्तद्दृ
नस्नानगमोद्भवस्मृतं॥ इति श्रीपद्मपुराणे पंचपंचाशत्साहस्र्यां संहितायां पातालखंडे कार्त्तिकमाहात्म्ये पृथु २५
नारदसंवादे कृष्णावेण्योर्म्महिमाना म चतुर्विंशतितमोध्यायः॥ श्रीकृष्णउवाच॥ इति तद्वचनं श्रुत्वा पृथुर्विस्मित
मानसः॥ संपूज्य नारदं नत्वा विसर्ज्ज तदा प्रिय॥ तस्मादेतद्द्वयं ह्येतन्मम मातीव प्रियंकरं॥ माघ कार्त्तिकयोर्म्म

द्व्रतथैवैकादशीव्रतं। वनस्पतीनां तु तुलसी मासानां कार्त्तिकः प्रियः॥ एकादशी तिथीनां च क्षेत्राणां द्वारका मम॥ एतेषां सेव
नं यस्तु करोति नियतेंद्रियः॥ स मे वल्लभतां याति न तथा यज्ञनादिभिः॥ पापेभ्यो न भयं तस्य यमस्यापि भयं न हि॥ एतेषां सेव
नं कांते कुर्वतामस्त्प्रसादतः॥ श्रीसत्यभामाउवाच॥ विस्मापनीयं तन्नाथ यस्त्वया कथितं मम॥ परदत्तेन पुण्येन कल
हा मुक्तिमागता॥ इत्थं प्रभावो मासोयं कार्त्तिकस्ते प्रियंकरः॥ स्वामिद्रोहादि पापानि तत्पुण्येन गतान्यहो॥ दत्तं चल
नते पुण्यं यत्परेण कृतं विभो। अदत्तं केन मार्गेण लभते चाधिमानवाः॥ श्रीकृष्णउवाच॥ अदत्तान्यपि पुण्यानि
पापानि च यथा नरैः। प्राप्यते येन कर्मणा येन तच्छृणु वल्लिशामय॥ देशग्राम कुलानि स्युर्भागभाञ्जि कृतादिषु कलौ
तु केवलं कर्त्ता फलं तु पुण्यपापयोः॥ अकृतेपि संसर्गे विभवस्य यमुदाहृतं। संसर्गात् पुण्यपापानि यथा यांति निबोध
तत्॥ एकत्र मैथुनाद्यानदेकपात्रस्थभोजनात्॥ फलार्द्धं प्राप्नुयान्मर्त्यो यथावत्पुण्यपापयोः॥ अध्यापनाद्याजनाद्देक
पंक्त्याशनादपि तु यों शं पुण्यपापानीं नित्यं प्राप्नोति मानवः॥ दर्शनश्रवणाभ्यां च मनोध्यानात्तथैव च॥ परस्य पुण्यपापानां शता
शं प्राप्नुयान्नरः॥ परस्य निंदां पैशून्यं धिक्कारं च करोति यः॥ तत्कृतं पातकं प्राप्य स्वपुण्यं प्रददाति सः॥ कुर्वतः पुण्यकर्माणि से
वां यः कुरुते परः। पत्नीभृतकशिष्येभ्यो यदन्यः कोपि मानवः॥ तस्य सेवानुरूपेण तत्पुण्यफलभाग्भवेत्॥ एकपंक्त्यश्नतां
यस्तु लंघयेत्परिवेषयन्॥ तस्य पुण्यषडंशं तु लभते हेयवलंघितः॥ स्नान संध्यादिकं कुर्वन्यस्पृशेद्वा प्रभाषते। स तत्पु
ण्यषष्ठांशं दद्यात्तस्मै तु निश्चितं॥ धर्मोद्देशेन यो द्रव्यं [illegible] याचयते नरः॥ तत्पुण्यकर्मजं तस्य धनदस्याप्नुयात्फलं॥ अ

Indira Gandhi National Centre for the Arts

पहृत्य परद्रव्यं पुण्यकर्म करोति यः। कर्मकर्तुस्त्वाप नागत तत्र धनिनस्तद्भवं फलं। नापनुत्य ऋणं यस्तु परस्य म्रियते नरः। धनी तस्य
पुण्यमादत्ते स्वधनस्यानुरूपतः। बुद्धिदस्त्वनुमंता च यश्चोपकरप्रदः। बलदस्त्वापि षष्ठांशं प्राप्नुयात्पुण्यपापयोः॥ प्रजाभ्यः
पुण्यपापानां राजा षष्ठांशभाग्भवेत्। शिष्याद्गुरुः स्त्रियो भर्त्ता पिता पुत्रात्तथैव च॥ स्वपतेरपि पुण्यस्य योषिदर्द्धमवाप्नुया
यात्॥ चेत्स्यानुव्रता चाज्ञाकर्त्री तुष्टिकारिणी॥ परहस्तेन दानाद्यं कुर्वतः पुण्यकर्मणः। विना भृतकपुत्राभ्यां कर्त्ता षष्ठांश
मुद्धरेत्॥ वृत्तिदो वृत्तिसंत्राता पुण्यषष्ठांशभाग् भवेत्॥ आत्मनो वा परस्यापि यदि सेवां न कारयेत्॥ श्रीकृष्ण उवाच॥ इ
त्थं ह्यदत्तान्यपि पुण्यपापान्यायांति नित्यं परसंचितानि। शृणुष्व चास्मिन्निति हास समग्रं पुरातनं पुण्यमतिप्रदं च॥ इति श्री
पद्मपुराणे कार्तिकमाहात्म्ये पुण्यपापांशप्राप्तिकथनं नाम पंचविंशतितमोऽध्यायः॥ श्रीकृष्ण उवाच॥ पुरावंतीपुरवा
सी विप्र आसीद्धनेश्वरः। ब्रह्मकर्मपरिभ्रष्टः पापनिष्ठः सुदुर्मतिः॥ रसकंबलचर्माद्यैः स सत्यानृतवृत्तिकः। स्तेयवे
श्यासुरापानद्यूतसंश्रममानसः। देशाद्देशांतरं गच्छन् क्रयविक्रयकारणात्। माहिष्मतीं पुरीमागात्कदाचित्स धनेश्वरः
माहिष्मत्या कृता पूर्वं तस्मान्माहिष्मती भवेत्॥ यस्यां वप्रगता जाति नर्मदा पापनाशिनी॥ कार्तिकव्रतिनस्तत्र जना ग्रा
मागतान शतं। सदृष्ट्वा विक्रयं कुर्वन्मासमेकमुवास ह॥ स नित्यं नर्मदातीरे भ्रमन्विक्रयकारणात्॥ ददर्श ब्राह्म २६
णान्स्नाताञ्जपदेवार्चने स्थितान्। कांश्चित्पुराणपठतः कांश्चित्तच्छ्रवणे रतान्॥ नृत्यगायनवादित्रविष्णुस्त
वनतत्परान्। विष्णुमुद्रांकितान्कांश्चित्तुलसीधारिणः। ददर्श कौतुकाविष्टस्तत्र तत्र धनेश्वरः। नित्यं परिभ्रमं

स्तद्दर्शनस्पर्शनाभाषणात् वैष्णवानां तथा विष्णोर्नामश्रावादि सोऽलभत्। एवं मासस्थितः सोऽथ कार्तिकोद्यापने विधौ। क्रि
यमाणं ददर्शासौ तत्केऽङ्गीगरणं हरेः। पौर्णिमास्यां ततोपश्यद्द्विप्रा गोभूजनादिकं दक्षिणा भोजनाद्यं च दीयमानं व्रतस्थितैः
ततो मासि मयपेचैव दीपोत्सवविधिं तदा। क्रियमाणं ततोपश्यत्प्रीत्यर्थं त्रिपुरद्विषः। त्रिपुराणां कृतो दाहो यतस्तस्यां ति
वेनतु। अतस्तु क्रियते तस्यां तिथौ नक्तैर्महोत्सवः। मम रुद्रस्य यः कश्चिदंतरं परिकल्पयेत्। तस्य पुण्यक्रिया सर्वा निष्फ
ला स्युर्न संशयः। तत्र नृत्यादिकं पश्यन् बभ्राम स धनेश्वरः। तावत्कृष्णाहिनादष्टो विह्वलः स पपात ह। जनास्तं पतितं वी
परिवव्रुः कृपान्विताः। तुलसीमिश्रितैस्तोयैस्तन्मुखं सिषिचुस्तदा। अथ स्वदेहं परित्यज्य तं बध्वा यमकिंकराः। बध्यमानं क
शाघातैर्निन्युः संयमनीं रुषा॥ चित्रगुप्तस्तु तं दृष्ट्वा निर्भर्त्स्यावेदयत्तदा। यमाय तेन बाल्याच्च कर्म यद्दुःकृतं कृतं॥ श्रीचित्रगुप्त उ
॥ नैवास्य दृश्यते किंचिद्बाल्यात्सुकृतं क्वचित्। दुष्कृतं शक्यते वक्तुं वर्षेणापि च भास्कर। पापमेव हि रयं दृष्टः केवलं दृश्य
ते विभो। तस्मादाकल्पमर्यादं निरये परिपच्यतां। श्रीकृष्ण उवाच। इति श्रुत्वा वचः क्रोधाद्यमः प्राह स्वकिंकरान्। दर्शय
न्नात्मनो रूपं कालाग्निसदृशप्रभं॥ श्रीयम उवाच॥ भोः प्रेतपतयस्त्वेनं बध्यमानं स्वमुद्गरैः। कुंभीपाके क्षिपंत्वाशु दुष्टकर्म
स्वदर्शनं॥ श्रीकृष्ण उवाच॥ ततो मुद्गरनिर्भिन्नमूर्द्धानं प्रेतपोऽनयत्। कुंभीपाके क्षिपच्चाशु तैलक्वथनशालिते॥ यावद्वह्नि
पस्तु तत्रासौ तावच्छीतलतां ययौ। कुंभीपाकोऽप्यथावह्निः प्रह्लादक्षेपणात्पुरा। तं दृष्ट्वा महदाश्चर्यं प्रेतपो विस्मयान्वितः॥
वेगादागत्य तत्सर्वं यमायावेदयत्तदा। यमस्तु कौतुकं श्रुत्वा प्रेतपेन निवेदितं। आः किमेतदिति प्रोक्त्वा तमानीय विचारयत्

Indira Gandhi National
Centre for the Arts

।तावदस्याग तस्तत्र नारदः प्राह सत्वरात्॥ यमेन पूजित स्तस्य कृतं दृष्ट्वा वाक्यमब्रवीत्॥ श्रीनारद उवाच॥ नैवायं निरयान्त्रो
क्तुं क्षमः सवित्तनंदन। यस्मादनेन संजातं कर्म यन्निरयापहं॥ यः पुण्यकर्मणां कुर्याद्दर्शनस्पर्शभाषणान्। तत्षडंशम
वाप्नोति पुण्यस्य नियतं नरः॥ स त्वं तु तेषां संसर्गं कृतवानेष यद्धरेः। कार्त्तिकव्रतिनिर्मासं तस्मात्पुण्यांशभागयं॥ परि
चर्याकरः षष्ठांशं पूर्णव्रतपुण्यभाक्। अतोस्यार्जितपुण्यस्य संख्यानं न विद्यते॥ कार्त्तिकव्रतिनां पुंसां पुण्यसंख्या न वि
द्यते। पातकानि महान्त्यपि॥ प्रदहेद्देवसर्वाणि विष्णुः संकल्पवत्सलः। अंते चनामदिस्तोयैः स्कलसीमिश्रितैस्त्वयं। वैष्णवैः स्ना
पितो विलीनांसमः संश्रावितोपि वा॥ तस्मान्निर्हृतपापोयं सद्गतिं प्राप्तुमर्हसि। वैष्णवानुग्रहीतोयं निरये नैव पच्यते। आर्द्र
शुष्कैर्यथा पापैर्निरयं तो गमिष्यति त्रिविधैः॥ प्राप्य तस्य कृतैस्तद्वत् संगस्तत्र निषिध्यते॥ तस्मादकामपुण्यो ह्ययं कृपालो निश्चि
तस्त्वयं॥ विलोक्य निरयान्सर्वान्पापभोगप्रदर्शकान्॥ श्रीकृष्ण उवाच॥ इत्युक्त्वा गतवति नारदे स सोरिस्तद्वाक्यश्रवणविबु
द्धतत्कर्मा॥ तं विप्रं पुनरनयत्स्वकिंकरेण तान्सर्वान्निरयगणान्प्रदर्शयिष्यन्॥ इति श्रीपद्मपुराणे पातालखंडे कार्त्ति
कमाहात्म्ये श्रीकृष्णसत्यभामासंवादे धनेश्वराख्याने षड्विंशतितमोऽध्यायः॥ श्रीकृष्ण उवाच॥ ततो धनेश्वरं नीत्वा निरयान्प्रे
तपो ब्रवीत्। प्रदर्शयिष्यन् तांस्तान्तियमस्य तु चरस्तदा॥ श्रीप्रेतप उवाच॥ पश्यैमान्निरयान्घोरान्धनेश्वर महाभया २७
न्येषु पापकरा नित्यं पच्यंते यमकिंकरैः। तप्तवालुकनामायं निरयो घोरदर्शनः। यस्मिन्नेते दग्धदेहाः क्रंदंते पापका
रिणः। अतिथीन्वैश्वदेवांते कुरुतामानागतान्नये। पूजयंति न ते हि पच्यंते स्वेन कर्मणा। गुर्वग्निब्राह्मणगाश्च देवान्मूर्द्ध

जिषिक्तकान्। ताडयंति पदा ये वै ते निर्दग्धांघ्रयस्त्विमे। षड्भेदस्त्वेष निरयो नानापापैः प्रपद्यते। तथैवांधतामिस्रोयं द्वि
यो निरयो महान्। तथा सूचीमुखो नाम तृतीयो नरको महान्। पश्य सूचीमुखैर्देहो भिद्यते पापकर्मिणः। असिपत्रवनाद्यो
श्च षड्भकारोप्ययं स्थितः। पत्नीपुत्रादिभिर्ये वै वियोगं प्रापयंति हि। इष्टैरन्यैरपि परान्पच्यंते ते इमे नराः। असिपत्रे छेद्य
मानाः छेद्दली व्यापलायिताः। पच्यंते पापिनः पश्य क्रंदमाना यतस्ततः। अर्गलाख्यो महाघोरश्चतुर्थो निरयो ह्ययं। पश्यन्नाना
विधैः पाशैराबध्य यमकिंकराः। मुद्गराद्यैर्वध्यमाना क्रंदंते ते तु पापिनः। मज्जनान्त्रार्गलाद्यैश्च निरुंधंतीह ये नराः। करग्रह
ह्येस्ते पापाः पच्यंते यमकिंकरैः। असावपि हि षड्भेदो वधबंधादिभिः स्थितः। कूटशाल्मलिनामानं निरयं पश्य पंचमं। यत्रो
गारनिरा एते शाल्मलाद्याः स्थिता द्विज। यत्र षोढाधि पक्षी ते यातनाभिरिमे नराः। परदारपरद्रव्यपरद्रोहरतः सदा। रक्तपूय
मिमं पश्य षष्ठं निरयमद्भुतं। अधोमुखा हि पच्यंते यत्र पापकृतो नराः। अनृतमनृतकानिंदापैशून्यादिरताश्च ये। मज्जमानाव
ध्यमाना क्रंदंते भैरवान्रवान्॥ षड्भकारो विगंधाद्यैरसावपि च संस्थितः। कुंभीपाकः सप्तमोयं निरयो घोरदर्शनः। षा
णतैलादिभिर्दग्धो धनेश्वर विलोकय। महापातकिनो येत्र क्वाथ्यंते यमकिंकरैः। बहून्यब्दसहस्राणि भ्राम्यमान्मज्जनमज्जनैः
चलाशिरोभिन्नानेतान्व्याधिकान्पश्य रौरवान्। अकामात्पातकं तु शुष्कं कामादार्द्रमुदाहृतं। आर्द्रशुष्कादिभिः पापैर्द्विःप्रक
रानवस्थितान्॥ चतुराशीतिसंख्याकैः पृथक्त्वेन रवस्थितान्॥ यत्पंक्तिकेपि पांक्तेयं मलिनीकरणं तथा। जातिभ्रंश
करं तद्वदुपपातकसंज्ञितं। अतिपापं महापापं सप्तधा पातकं स्मृतं॥ एभिः सप्तसु पच्यंते निरयेषु यथाक्रमं॥ कार्त्तिक

मंडूकमत्कुणमूषकादिकुरंगीवानावधः २

स्त्रीशूद्रोद्विजसेवारतं अज्ञोत्पन्नभोजनं मलिनीकरणी।

Centre for the Arts

ज्ञातिन्नियं स्मासंसर्गो ह्यनर्वाते स्नुण्यो पञ्चयादेते निहताः खलु जंतवः॥ श्रीकृष्ण उवाच॥ दर्शायित्वेति नियान्स्रेतपस्तमथा
हरत॥ धनेश्वरं [illegible] लोकं यरुध्यात्तूसतत्रह॥ धनद [illegible] स्यानुगः सोयं धनय इरति स्मृत॥ यदा स्वयाकरो त्री
र्थमियो ध्याया ज्जगाधिजः॥ ॥ एवंप्र नावः खलु कार्त्तिकोयं मुक्तिप्रदो मुक्तिकरश्च यस्मात्॥ प्रयात्यनेना र्जि
तपातको पि व्रतस्य संदर्शनतोपिमुः ॥ इति श्रीपद्मपुराणे पाताल खंडे कार्त्तिकमाहात्म्ये श्रीकृष्णसत्यभामासं
वादे धनेश्वरस्याने सप्तविंशतितमो ध्यायः॥ श्रीसूत उवाच॥ इत्युक्त्वा सुरदेवोसौ सत्यभामामतिप्रियां॥ सायं सं
ध्यादिकं कर्तुं जगाम जननीगृहं॥ एवंप्रभावः प्रोक्तोयं कार्त्तिकः पापनाशनः॥ विष्णुप्रियकरो नित्यं मुक्तिमुक्तिफलप्र
दः॥ हरिजागरणं प्रातः स्नानं तुलसि सेवनं॥ उद्यापनं दीपदानं व्रतान्येतानि कार्त्तिके॥ पंचकैर्व्रतकर्तृभिः संपूर्णं
कार्त्तिकव्रती॥ फलमाप्नोति तत्प्रोक्तं मुक्तिमुक्तिफलप्रदं॥ श्रीऋषय ऊचुः॥ विष्णुप्रियो निफलदः प्रियो हो महर्षणः॥
कार्त्तिकस्य विधिः सम्यक् सतिहासातिविस्मयः॥ अतस्य वकर्तव्यः पापदुःखविनाशकृत्॥ मोक्षार्थिभिर्नरैः सम्य
क्भोगकामैस्तथापि वा॥ एवं स्थिते यदा कश्चिद्व्रतस्थः संकटस्थितः॥ दुर्गारण्ये स्थितो वापि व्याधिभिः परिपीडितः॥ कथं
तेन प्रकर्तव्यं कार्त्तिकव्रतकं शुभं॥ यथा स्यात्तत्फलं दत्त्या चस्य सर्वदा नरैः॥ श्रीसूत उवाच॥ एवमापद्गतो यस्तु नरो २८
निराहारव्रतः॥ कार्त्तिकव्रतकं तेन कर्तव्यं तु यथा भवेत्॥ तत्सर्वं कथयिष्ये दश्रृणुध्वं मुनिपुंगवाः॥ विष्णोः शिवस्य वा
कुर्यादालये हरिजागरं॥ शिवविष्णुगृहाभावे सर्वदेवालयेष्वपि॥ दुर्गारण्ये स्थितो यश्च यदि वापद्गतो भवेत्॥ कुर्यात्ति

दाश्वत्थमूले तुलसीनां वनेष्वपि॥ विष्णुनामप्रबंधानां गायनाद्विष्णुसन्निधौ॥ गोसहस्रप्रदानस्य फलमाप्नोति मानवः॥ वाद्य
कृत्पुरुषश्चापि वाजपेयफलं लभेत्॥ सर्वतीर्थाविहीगो कृतनर्तकः फलमाप्नुयात्॥ सर्वमेतल्लभेत्पुण्यमेतेषां द्रव्यदः पुमा
न्॥ श्रावसंदर्शनात्स्योहितत्षडंशमवाप्नुयात्॥ आपद्गतो यदा पंतो नतलभे सेवनाय यः॥ व्याधितो वा पुनःकृपा द्विष्णोर्न्यांगि
पमार्जनं॥ उद्यापनविधिं कर्तुमशक्तो यो व्रतेस्थितः॥ ब्राह्मणान्भोजयेच्छक्त्या व्रतसंपूर्णहेतवे॥ अव्यक्तरूपिणो विष्णोः स्वरूपं
ब्राह्मणास्तु वितस्मं तुष्टास संतुष्टः सर्वदा स्यान्न संशयः॥ अशक्तो दीपदानस्य परदीपं प्रबोधयेत्॥ तेषां वा रक्षणं कुर्याद्वाताद्वि
भ्यः प्रयत्नतः॥ अभावे तुलसीनां च पूजयेद्वैष्णवं द्विजं॥ यस्मात्संनिहितो विष्णुः स्वभक्तेष्वेव सर्वदा॥ सर्वाभावे व्रती कुर्याद्ब्राह्मणानां
गवामपि॥ सेवां वा बोधिवटयोर्व्रतसंपूर्णहेतवे॥ ऋषय ऊचुः॥ कथं त्वया श्वत्थवटौ गोब्राह्मणसमौ कृतौ॥ सर्वेभ्योपि तरुभ्योस्तौ
कस्मात्पूज्यतरौ कृतौ॥ श्रीसूत उवाच॥ अश्वत्थरूपी भगवान्विष्णुरेव न संशयः॥ रुद्ररूपी वटस्तद्वत्पालाशो ब्रह्मरूपधृक्॥
दर्शनं पूजनं सेवा तेषां पापाहरा स्मृताः॥ दुःखापद्व्याधिदुष्टानां विनाशकरणी ध्रुवं॥ ऋषय ऊचुः॥ कथं वृक्षत्वमापन्ना ब्रह्माविष्
णुमहेश्वराः॥ एतत्कथय सर्वज्ञ संशयात्र महान्हि नः॥ सूत उवाच॥ पार्वती शिवयोर्देवैः सुरतं कुर्वतोः किल॥ अग्निर्ब्राह्मण
रूपेण प्रेषितो विघ्नं कृतं पुरा॥ ततस्तु पार्वती क्रुद्धा शशाप त्रिदिवौकसः॥ रेतोस्य गर्भसुखस्य शापं किंपमानारुषान्तदा॥ श्रीपार्व
त्युवाच॥ कृमिकीटादयोप्येते जानंति सुरतेसुखं॥ तद्विघ्नकरणाद्देवा ह्युद्भिज्जत्वमवाप्स्य॥ श्रीसूत उवाच॥ एवं सा पार्वती दे
वान्शशाप क्रुद्धमानसा॥ तस्माद्वृक्षत्वमापन्नाः सर्वदेवगणाः किल॥ तस्मादिमौ विष्णुमहेश्वरावुभौ बभूवतुर्बोधिवटौ मुने॥

Indira Gandhi National
Centre for the Arts

श्वरः॥ बोधिस्त्वगादार्क्कदिनदिनेव मस्पृश्यताम र्क्करुविष्टियोगात्॥ इति श्रीपद्मपुराणे पाताल खंडे कार्तिकमाहात्म्ये अश्वत्थ
वटपलाशप्रशंसनं नाम द्वाविंशातितमोध्यायः॥ श्रीऋषय ऊचुः॥ अस्पृश्यत्वं कथयतः सूत बोधितरुस्त्वयं। स्पृश्यत्वं
च कथं प्राप्तस्तथा यं शनिवासरे॥ श्रीसूत उवाच॥ समुद्रमथनाद्यानि रत्नानि त्रिपुः सुरोत्तमाः॥ श्रियं चकौस्तुभं तेषां विष्णवे
प्रददुः सुराः॥ यावदंगीवकाराशौ लक्ष्मीं सार्यार्थमात्मनः॥ तावद्विज्ञापयामास लक्ष्मीं सा चक्रपाणिनं॥ श्रीलक्ष्मीरुवाच॥
असंस्कृत्य कथं ज्येष्ठां कनिष्ठा परिणीयते॥ तस्मान्ममाग्रजां मातामल क्ष्मीं मधुसूदन॥ विवाहयततः पश्चादेषधर्मः सना
तनः॥ श्रीसूत उवाच॥ इति तद्वचनं श्रुत्वा स विष्णुर्लोकभावनः। उद्दालकाय मुनये प्रददौ घर्मपसौ तदा॥ आसवाक्यानुरोध
नतामलक्ष्मीं ददौ किल॥ स्थूलोष्ठां शुष्करदनां गजाभि बिल्वलीतनुं। क्षिनतां रक्तनयनां रूक्षपिंगशिरोरुहां॥ स मुनि
र्विष्णुवाक्यान्नामंगीकृत्य स्वमाश्रम॥ वेदध्वनि समायुक्तमानयामास धर्मवित्॥ होमधूमसुगंधाढ्यं वेदघोषनि
नादितं॥ आश्रमं तं समालोक्य व्यथिता साब्रवीदिदं॥ ज्येष्ठोवाच॥ नहि वासानुरूपो यं वेदध्वनियुतो मम॥ नो त्रागमिष्येत्न
ब्रह्मन्नत यस्वान्यत्र मा धुवं॥ श्रीउद्दालक उवाच॥ कथं त्वायासि किं चात्र वर्त्तते सततं तव॥ तव योग्या च वसतिः का त
वेष्ठवद स्वतत्त्वं॥ ज्येष्ठोवाच॥ वेदध्वनिर्नविद्यस्मिन्न तिष्ठीनां च मज्जनं॥ यज्ञदानादिकं चापि नैव तत्र वसाम्यहं॥ पर २९
स्परानुरागेण दांपत्यं यत्र वर्त्तते॥ पितृदेवार्चनं चैव तत्र नैव वसाम्यहं॥ दुर्णोदररता यत्र परद्रव्यापहारिणः॥ परदार
रताश्चापि तस्मिन्स्थाने रतिर्मम॥ वृद्धः सज्जनविप्राणां यत्र स्यादपमाननं॥ निष्ठुरं भाषणं यत्र तत्र नित्यं वसाम्यहं

ता
॥ श्रीसूत उवाच॥ इति तद्वचनं श्रुत्वा विषण्णवदनो भवत्॥ नायामीति ततः सोपि श्रुत्वाप्युदा तु रोभवत्॥ उद्दालकस्ततो वाक्यं
मलक्ष्मीमुवाच ह॥ श्रीउद्दालक उवाच॥ अश्वत्थवृक्षमूले स्मिन्नलक्ष्मि स्थीयतां क्षणं। आवासस्थानमालोक्य यावदायास्य
म्यहं पुनः॥ श्रीसूत उवाच॥ इति तां तत्र संस्थाप्य जगामोद्दालकस्तदा॥ प्रतीक्ष्यापि चिरं तत्र यदा तं न ददर्श सा॥ तदा
रुरोद करुणं भर्तृत्यागेन दुःखिता॥ तत्र स्या रुदितं लक्ष्मी वैकुंठभुवने शृणोत्॥ तदा विज्ञापयामास विष्णुमुद्विग्न
मानसा॥ श्रीलक्ष्मीरुवाच॥ स्वामिन्मद्भगिनी ज्येष्ठा भर्तृत्यागेन दुःखिता॥ तामाश्वासयितुं याहि कृपालो यदि ते प्रि
या॥ श्रीसूत उवाच॥ लक्ष्म्या सह ततो विष्णुस्तत्रागत्य कृपान्वितः॥ आश्वासयन्नलक्ष्मीं तामिदं वचनमब्रवीत्॥ श्रीकृष्ण उवा
च॥ अश्वत्थवृक्षमूले हि सदा ज्येष्ठे स्थिरा भव॥ ममांशसंभवो ह्येष आवासस्ते मया कृतः॥ प्रत्यब्दं येर्चयिष्यंति त्वां ज्येष्ठां गृह
धर्मिणः॥ तेषां श्रीः कनिष्ठा ते भगिनी निश्चला स्मृतैः॥ श्रीसूत उवाच॥ एवं विष्णुः प्रयायुज्येष्ठा स्थिता बोधितरौ सदा॥ ततोश्वत्थ
तरोः स्पर्शी ज्येष्ठावासो न रोभवत्॥ अतो मन्दवर्जं विप्रा हरज्येष्ठा निवासतः॥ अस्पृश्यो हं नृणां जातोपृज्य स्वातः कृपां कुरु॥
ततोश्वत्थाय गोविंदः प्रादादूरमनुत्तमं॥ शनैश्चरदिने ज्येष्ठा चन्द्रोदूरीन विष्यति॥ तदा त्वां ये र्चयिष्यंति तेन सौभाग्यादिभाजनं॥
अतोश्वत्थः शनेर्वारे संसेव्यः श्रीसमृद्धये॥ अन्यत्र दिवसे तस्य स्पर्शं कुर्यान्न कश्चित॥ एतत्कार्त्तिकमाहात्म्यं शृणुयाद्यः
पठेत वा स सर्वान्प्रश्नुयात्कामानंते विष्णोः सलोकतां॥ लेखयित्वा तु विप्राय योदद्याद्विदुषे त्विदं॥ तस्य पुण्यं गोसहस्रदानोत्थं

Indira Gandhi National
Centre for the Arts

वतिध्रुवम्॥ ॥इतिश्री पद्मपुराणे पंचपंचाशत्साहस्र्यां संहितायां पातालखंडे कार्त्तिकमाहात्म्ये ज्येष्ठाकनिष्ठाख्याने ए
कोनत्रिंशत्तमोध्यायः॥ ॥कार्त्तिकमाहात्म्यं समाप्तं॥ ॥शुभंभवतु॥ ॥कल्याणमस्तु॥ संवत् १८७३ आश्विनशुक्ल
भौमे लिखितं राघवेंद्रेण स्वार्थं परार्थं च॥ ॥मंगलं लेखकानां च वाचकानां च मंग[illegible]ं गलं सर्वलोकानां भूपतीनां
च मंगलं॥ ॥परमिममनुपदेशमाद्रियध्वं निगमवनेषु नितांतखेदखिन्नाः॥ विचिनुत भवनेषु वल्लवीनामुपनिषदा
र्थमुलूखले निबद्धं॥ ॥महत्तत्वं॥ अहंकारः पंचभूतानि॥ इंद्रियाणि॥११ देवाः॥११ अज्ञानसर्गः॥ एते प्राकृताः षट् सर्गाः
ऊर्द्ध्वस्रोताः तिर्यक्स्रोताः॥ अर्वाक्स्रोताः॥ एते वैकृतास्त्रयः सर्गाः॥ जीवेश्वरौ विशुद्धा चिदविद्या तत्कृता भिदा॥ आ
त्मनोऽज्ञानसंबंधः षडस्माकमनादयः॥ आनृशंस्यं क्षमा सत्यमहिंसा दममार्जवं॥ प्रीतिः प्रसादो माधुर्यम
क्रोधश्च यमा दश॥ ॥दानमिज्या तपो ध्यानं स्वाध्यायोपस्थनिग्रहः॥ व्रतोपवासमौनं च स्नानं च नियमा दश॥ ३०

दी० रामकृष्णस्येदं पुस्तकं

Indira Gandhi National
Centre for the Arts